THE

AÇMĪRAÇABDĀMṚTA

A

KĀÇMĪRĪ GRAMMAR

WRITTEN IN THE SANSKRIT LANGUAGES

BY

ĪÇVARA-KAULA.

EDITED

WITH NOTES AND ADDITIONS

BY

G. A. GRIERSON, C.I.E., PH.D., I.C.S.

PART I.

DECLENSION.

CALCUTTA:

PUBLISHED BY THE ASIATIC SOCIETY, 57, PARK STREET.

1897.

NOTE.

(Preliminary.)

This edition of the Kaçmīraçabdāmṛta of Īçvara-kaula has been prepared from a single MS. which the Editor owes to the courtesy of Bābū Nīlāmbara Mukarji. The MS. was presented to that gentleman by the Author himself, and has been carefully revised by him in his own handwriting. It may therefore be taken as the Author's final statement of his views on Kāçmīrī Grammar. Considering the authoritative nature of the MS. the Editor has not felt justified in making any alterations when preparing it for the Press. All that he has done has been to correct obvious slips of the pen. In most cases, when the Author in the course of his revision, altered a rule, he carefully made the necessary corrections in other portions of the work to which the rule incidentally applied. Here and there he has omitted to do so, and the Editor has exercised his discretion in making the necessary corrections or not. When it has been merely a question of spelling, he has usually done so, so as to secure uniformity in this most important particular. In more serious points, even when the Author is clearly wrong, *e.g.*, when he marks the first उ *u* in गुरु *gụr^u*, a horse, as modified when it is certainly not modified (thus, गुरु *gur^u*), the Editor has left the text unaltered, and has contented himself with adding a footnote. Any additions made by the Editor, which are principally cross-references and a few rules added to make the work more accurate and more complete, are enclosed in square brackets. The reader can thus at once see what is the Author's and what is the Editor's.

Īçvaraḳ-kaula's work is a Grammar of the Kāçmīrī language written in Sanskrit, on the model of an ordinary *vyākaraṇa*. It is an excellent work, and might have been composed by Hēmacandra himself. Kāçmīrī is a language which is very little known, but which is of great importance for the purposes of comparative philology. Existing Grammars of it have been made by foreigners, and are imperfect. They all suffer from at least one grave fault, *viz.*, that they are based on the representation of the language which is displayed to them by the Persian alphabet, a system of characters which is quite unable to express the many broken vowel sounds in the language. Īçvara-kaula has adopted the Dēvanāgarī character, ingeniously modified to suit his purpose. With his system, there is no doubt, whatever, as to what is the exact sound of each word in the language. The phase

of the language which is illustrated by him is that spoken by Hindūs of the Ci[ty] of Çrīnagar. It differs slightly from the dialect used by Musalmāns and from that used in the rest of the valley. Former Grammars have been based on the Musalmān language, which is that used by 90 per cent. of the population of [the] Happy Valley. The Hindū dialect has, however, its value. It is the languag[e of] the educated ruling class, and its contamination with Persian has been prevent[ed] by a wholesome tradition, which had no hold on the Muḥammadan inhabitant[s]. It is hence much the purest form of the tongue.

Īçvara-kaula is not always consistent in his spelling. At least in two cases, he represents the same sound by various modes of spelling. It is important to note these in order to understand his Grammar. In the first place, he treats ञ् *ñ* and ञू *ñ*$^{\bar{u}}$ as convertible terms. He nowhere says this, and unless the reader is forewarned he will find himself puzzled more than once. Thus on p. 14 he writes चामंञू *tsāmaṇñ*$^{\bar{u}}$, but on p. 24 क्रपरामंञ् *kṛpārāmaṇñ*, and again, on p. 103, he writes words like वंञ् *waṇñ*, although he has, only a page or two back, said that these feminines must end in *ū-mātrā*, and we should hence except वंञू *waṇñ*$^{\bar{u}}$. In the second place, he is not consistent in his spelling of words which etymologically end in *i* followed by a consonant followed by *u-mātrā*. Take, for instance, the word कितु *kit*$^{\bar{u}}$. This is no doubt the correct etymological spelling, but the word is pronounced क्युत् *kyut*, and thus he occasionally writes similar words, as in the case of मंज़्युम् *maṇzyum*, on p. 64. He generally, however, spells it क्युतु *kyut*^{u}, which is no doubt the best way of dealing with the problem; for to omit the *u-mātrā* would be to play havoc with all the Author's rules of declension. Sometimes Īçvara-kaula uses one system of spelling, and sometimes another, and, in this case, the Editor has not felt himself at liberty to choose only one method, as it would entail too free a treatment of the text.

The Editor had intended to prefix to the present instalment of the Grammar, an account of the rules of the Kāçmīrī language, as given by the Author; but an affection of the eyes has put a stop for the present to his studies, and he must postpone a formal introduction to the completion of the work. The part now issued takes the student down to the end of Declension. The work will be completed in one more instalment which will deal with the Verb. The Author commences his Grammar with a chapter on the rules of Sandhi or Combination of Vowels only. Then follows a chapter on Declension, divided into three sections, the first describing the declension of Nouns, Substantive and Adjective, the second the luxuriant varieties of the Vocative Case, and the third the declension of

Pronouns. We next have a short chapter on Concordance and Composition of Nouns, and a long one on Secondary Suffixes, or the Formation of Nouns and Adjectives from other nouns and adjectives. The first part, now issued, concludes with a chapter on Indeclinables and another on the Formation of Feminines. The second part will contain a *Dhātupāṭha,* a chapter on Conjugation, and a chapter on Primary Suffixes, or the formation of Substantives, Adjectives, and various Verbal Forms from Roots.

In default of an exposition of the peculiarities of Kāçmīrī pronunciation, which, for the reason above stated the Editor is unable at present to give, he would refer the reader to his article on the Kāçmīrī vowel system which has appeared in the *Journal* of the Bengal Asiatic Society for 1896, pp. 280 & ff. This will be found to give all the necessary information, and to explain the system of spelling adopted by Īçvara-kaula.

The Editor has read the Grammar carefully through with Paṇḍit Mukunda Rāma Çāstrī, a Kāçmīrī born and bred in Çrīnagar, who came down to Patna for the purpose. The Paṇḍit has also read the proof sheets with him and has elucidated many doubtful points. The Editor is glad to have an opportunity of acknowledging the assistance which he has received from so learned and intelligent a co-worker.

The printing, which was a more complicated business than ordinary, has been carried out at Patna, under the Editor's personal supervision, and his thanks are due to the printers, Babu Rām Dīn Singh and Babu Sāhib Prasād Singh for the care with which the work has been carried out.

BANKIPUR :
17*th March*, 1897.

ॐ श्रीगणेशाय नमः ।

अथ

कश्मीरशब्दामृतं

लिख्यते ॥

यत्प्रसादाद्घना विघ्नगणा यान्ति ह्यगण्यताम् ।
अभीप्सिताय तं वन्दे शरदीव घनाघनाः ॥ १ ॥
तां वन्दे या चतुष्षष्टिवर्णरूपेण भारती ।
वागर्थरूपवन्यायां क्रीडयत्यखिलान्कृतीन् ॥ २ ॥
कश्मीरे संस्कृता भाषा ह्यभूदित्यनुमीयते ।
पूर्वं सैवाधुना कालवशात्संकरतामिता ॥ ३ ॥
सूत्रधातुनिबन्धेन शब्दाश्चाधुनिकाः क्रियाः ।
व्याक्रियन्ते तथा नोपभ्रष्टाः स्युस्ते पुनर्यथा ॥ ४ ॥
यस्य हृत्सदने वाञ्छे प्रभातो ऽच्छप्रपूरिते ।
इवाभीक्ष्णमसापत्न्यसूचके धरणीपतेः ॥ ५ ॥
तस्य राजाधिराजस्य जम्बूकश्मीरभूभुजः ।
श्रीमच्छ्रीरणवीराख्यसिंहस्यामिततेजसः ।
अतिवेलप्रसादाप्तवृत्तिना क्रियते त्विदम् ॥ ६ ॥
संवीक्ष्य कल्पनाभोगं हृष्यन्त्वस्मिन्सुपूरुषाः ।
स्वोत्पादने पितृद्वेषी कुहनो ऽन्यस्य का कथा ॥ ७ ॥

वेदव्याकरणे किल त्रिनयनाभ्यस्ते च सारस्वत
ऐन्द्रे सादर ऐन्दवे सुमनसां यो बाहुलेये ऽपि च ।
प्रीत्या इश्वरकौल ईशनिरतः कश्मीरशब्दामृतं
सद्वर्षे सुतिथौ शुभोडुनि शुभे घस्रे च मासे व्यधात् ॥ ८ ॥

[८ । अस्य श्लोकस्य श्लिष्टार्थपदेभ्यो ऽयमर्थान्तरो व्यज्यते, वेदव्याकरणे वेदा इति संख्यार्थे चत्वारि, व्याकरणानि अष्टौ, अङ्कानां वामतो गतिरिति नयेन तच्चतुरष्टरूपं संख्यानं चतुरशीतिर्भवति तस्मिंश्चतुरशीत्यात्मके ८४ संख्याने त्रिनयनाभ्यस्ते त्रिभिर्नयनाभ्यां द्वाभ्यां पूर्वरीत्या त्रयोविंशत्या अभ्यस्ते गुणिते सति द्वि२त्रि३नव९एका१त्मिका संख्या अर्थत एकोनविंशतिः शतं द्वात्रिंशच्च जायते, तत्संख्यात्मके सद्वर्षे एकोनविंशतिशताधिकद्वात्रिंशे वैक्रमे संवत्सरे इत्यन्वयः, तथा सारस्वते सुतिथौ सरस्वतीदेवतायां तिथौ पञ्चम्यामिति यावत्, पुनश्च ऐन्द्रे शुभोडुनि सति इन्द्रदेवतात्मके ज्येष्ठानक्षत्रे, घस्रे च शुभे ऐन्दवे इन्दुर्देवता-स्येत्यैन्दवः सोमवासरे इत्यर्थः, मासे च बाहुलेये बहुलाः कृत्तिकाः तद्युता पौर्णमासी यस्मिन्मासे कार्तिके इत्यर्थः. शुभपदेन अवशिष्टः शुक्लपक्षो ऽवगम्यते इति भावः ॥ तथाकृते । संवत् १९३२ कार्तिकशुक्लपञ्चम्यां सोमवासरे ज्येष्ठानक्षत्रे ईशनिरतः शिवभक्त ईश्वरकौलः सुमनसां सहृदयानां देवानां च प्रीत्यै कश्मीरशब्दामृतम् नाम इदं कश्मीरभाषाव्याकरणं व्यधात् निरमादिति ॥]

ॐ अक्षरसंकेतपरिपाटीयम् ।

तत्रादौ काश्मीरभाषायां वर्गचतुर्थाक्षराणि क्वचिन्नोचार्यन्ते ञकारश्च प्रसिद्धोच्चारणतया न शब्दायत इति बोध्यम् ॥

प्रसिद्धा वर्णाः ।

अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः क ख ग ङ च छ ज ट ठ ड त थ द न प फ ब म य र ल व श ष स ह क्ष ॥

अप्रसिद्धानां संकेतः ।

अ॑ आ॑ उ॑ ऊ॑ ऋ॑ च़ छ़ ज़ झ़ ॥

भाषाशब्दाः । अ॑गुनु । अ॑लतु । आ॑शिद् । उ॑जुलु[1] । ऋ॑थ् ॥
संस्कृताः शब्दाः । अग्निः । अलक्तः । आश्विनः । उज्ज्वलः । ऋतुः ॥

भाषाशब्दाः । प॑पु । त॑नु । दा॑रू । गु॑रु[2] [?] । तृ॑रू । कृ॑मू ॥
संस्कृताः शब्दाः । पक्वः । तनु । श्मश्रु । अश्वः । शीतम् । कूर्मः ॥

भाषाशब्दाः । व॑रि । प॑पि । द॑रि ॥ व॑रु । प॑पु । द॑रु ॥
संस्कृताः शब्दाः । वलयाः । पक्वाः । दृढाः ॥ वलयः । पक्वः । दृढः ॥

भाषाशब्दाः । द॑रू । प॑पू । व॑रू ॥ च़॑रु । छ़॑रु । ज़॑रु । पोञ़् ॥
संस्कृताः शब्दाः । दृढा । पक्वा । अप्रसूता ॥ बहु । रिक्तम् । बधिरः । पानीयम् ॥

अत्रोर्ध्वचिह्नं स्वरस्याधोबिन्दुर्व्यञ्जनस्य ज्ञेया । तथा ऊकारमात्रा (पू) इकारमात्रा (रि) उकारस्य (रु) ज्ञेया ॥

[[1] वुज़ुलु इत्यपि ॥]

[[2] सर्वदा हि गुरुइत्यत्र गकाराश्रित उकारः प्रसिद्धतयोच्चार्यते ॥]

कश्मीरशब्दामृतम् ।

तत्रादौ ।

संधिप्रकरणम् ॥१॥

संधिसिद्धिः पदेषु ॥ १ ॥

अत्र वक्ष्यमाणशब्दशास्त्रे संधेः (अक्षरसंयोगस्य) सिद्धिः (विधानं) पदेषु (लिङ्गस्वरूपेषु धातुस्वरूपेषु च) विज्ञेया ॥

॥ न वाक्येषु ॥ २ ॥

अत्र तिङन्तसुबन्तसमुदायरूपेषु वाक्येषु संधिर्नावधार्यः ॥

॥ व्यञ्जनं परेण संधेयम् ॥ ३ ॥

ताप् उकु । अनेन संधौ कृते । तापुकु । आतपस्य ॥ इति सिद्धम् ॥ कर् यान् । अनेन संयोगे कृते कर्यान् । चकार । इति सिद्धम् ॥ पदेषु किम् । तिम् आय् । त आयाताः । अत्रोभयोः सुबन्ततिङन्तयोर्विद्यमानत्वात्संधिनिषेधः ॥

॥ असवर्णे ऽकारस्य लोपः ॥ ४ ॥

ड्यक उकु । गाट उलु । अनेन अकारस्य लोपे कृते । ड्यकुकु । ललाटस्य ॥ गाटुलु । बुद्धिमान् । इति सिद्धम् ॥ पदेषु किम् । ग़्ह् व्वल । तुम् एहि । अत्र

संधिर्न भवति ॥ [क्वाचित्को ऽयं विधिरुकारादिष्वसवर्णेषु विध्यन्तरस्य वक्ष्य-माणत्वात्] ॥

॥ स्वरः सवर्णे दीर्घपरलोपौ ॥ ५ ॥

करान् छ्य आ । अंछि इट् । अनेन दीर्घे परलोपे च कृते । करान् छ्या । [सा किं नु करोति] । अछीट् । [दृर्दृष्टिः] [सू० ४।३६] । इति सिद्धम् ॥ पदेषु किम् । पंछि इम् । अतिथय एते । इत्यत्र संधिर्न भवति ॥

[॥ अकारे ऽकारलोपः ॥ ५ क ॥

गर अन् । अनेन अकारस्य लोपः । गरन् । गृहाणि । इति सिद्धम् ॥]

॥ अकार इकार ए ॥ ६ ॥

अकार इकारे परे एकारो भवति परलोपश्च ॥ च्य इन् । [च्येन् । तेन पीतानि] ॥ च्यकारादकारविश्लेषं कृत्वानेनाकारस्यैकारे कृते च्येन् इति सिद्धम् ॥

॥ उकार ओ ॥ ७ ॥

अकार उकारे परे ओकारो भवति परलोपश्च ॥ ख्य उन् । ख्योन् । तेन खादितम्] ॥ च्य उन् च्योन् । [तेन पीतम्] ॥ अत्राकारोकारयोः संधौ कृते अनेन ओकारपरलोपौ ॥

॥ एकार ऐ ॥ ८ ॥

अकार एकारे परे ऐ संपद्यते ॥ ग एय् । [गैय् । ते गताः] ॥ प्य एय् । [प्यैय् । ते पतिताः] ॥ अनेन संधौ कृते गैय् प्यैय् इति भवति ॥

[क । इदं सूत्रं ग्रन्थकृतात्र लिखितं नास्ति लिङ्गपादस्थ ९२ सूत्रमध्ये त्वनुक्तष्टम् । तस्मादवश्योपयोग्यत्र मध्ये प्रक्षिप्तम् ॥]

॥ ओकार औ ॥९॥

अकार ओकारे परे औ भवति ॥ ग ओव् । प्य ओव् ॥ अनेन संधौ कृते । गौव [। स गतः] ॥ प्यौव् [। स पतितः] ॥

॥ इकारो ऽसावर्णे यो ऽपरलोपः ॥ १०॥

इकारो ऽसवर्णे स्वरे न परलोपो यस्य तथाविधो यः संपद्यते ॥ करि उकु । इकारस्य यत्वे परलोपाभावे च व्यञ्जनं परेण संधेयमिति (सू० ३) । कर्युकु । इति सिद्धम् ॥ पदेषु किम् । कति आय् । कुत आगताः । इत्यत्र वाक्ययोर्विद्यमानत्वात्संधिनिषेधः ॥

॥ उकारो वः ॥ ११ ॥

उकारो ऽसवर्णे स्वरे परे वकारो भवति परलोपाभावश्च ॥ करान् छु आ । अनेन वत्वे कृते । करान् छ्वा [। स किं नु करोति]। इति सिद्धम् ॥ पदेषु किम् पट्ठु अन् । और्णमानय । अत्र संधिनिषेधः ॥

इति श्रीशारदाक्षेत्रभाषाव्याकरणे
कश्मीरशब्दामृते संधिप्रकरणम् ॥१॥

अथ लिङ्गप्रकरणं ॥२॥

लिङ्गपादः ॥१॥

॥ अकारान्तानां प्रथमैकबहुत्वे लिङ्गवत् ॥ १ ॥

अकारान्तानां लिङ्गानामेकवचनं बहुवचनं च स्त्रीपुंसोर्लिङ्गवद्विज्ञेयम् ॥ ड्यक। ललाटम् ॥ ड्यक। ललाटानि ॥ व्यञ । भगिनी ॥ व्यञ । भगिन्यः ॥

॥ ऊदन्तानां पुंसि ॥ २ ॥

ऊकारान्तानां च लिङ्गानां प्रथमाया एकवचनं बहुवचनं च लिङ्गवद्विज्ञेयं पुंलिङ्ग एव ॥ अत्र शारदाक्षेत्रभाषाशब्दशास्त्रे इकारान्तं लिङ्गमुवर्णान्तं च लिङ्गं तत्तन्मात्रिकान्तमेव बोध्यम्। न तु संपूर्णम्। किंतु तेषु पूर्ववर्णसंबन्धिनः स्वरस्याप्रसिद्धता विज्ञेया। [७० सूत्रोक्तो विधिरयम्]। सा च आकारस्य अकारप्लुतत्वशब्दवद्भवतीति परिभाष्यते ॥ दांनू। करकः। अनार ॥ दांनू। करकाः। बहुत अनार ॥ पुंसि किम्। बंडू। महती। बडी ॥ बज्य। महत्यः। बडियाँ ॥

॥ व्यञ्जनान्तानां च ॥ ३ ॥

व्यञ्जनान्तानां पुंलिङ्गानां प्रथमैकबहुत्वे लिङ्गवद्भवतः ॥ दय्। ईश्वरः। ईश्वर ॥ दय्। ईश्वराः। बहुत ईश्वर ॥

॥ इप्रत्ययस्याकारो व्यञ्जने ॥ ४ ॥

व्यञ्जनान्तानां पुंलिङ्गानामकारान्तानां च व्यञ्जने परे इप्रत्ययस्य अकारो भवति॥गर सूंतिन्।गृहेण। घर कर के॥ वाल सूंतिन् । वालेन। बाल कर के॥ गर शब्दात् वाल् शब्दात् च। हेतौ सूंतिन्नन्तौ सूत्यन्तौ वा (सू० ५९) इत्यनेन इ सूंतिन्प्रत्ययः। अनेन इकारस्य अकारः। अकारव्यञ्जनान्तानां किम्। गुरि सूंतिन्। अश्वेन। घोडे कर के॥ व्यञ्जने किम् । गुरि लोयु। अश्वेन हतः। घोडे ने मारा॥ पुंसि किम्। मालि सूंतिन्। मालया। माला कर के॥

॥ न संख्यावाचिभ्यः ॥ ५ ॥

संख्यावाचिभ्यो व्यञ्जनान्तेभ्यो लिङ्गेभ्यः इप्रत्ययस्य अकारो न भवति॥ सति सूंतिन्। सप्तभिः। सात कर के॥ ऐठि सूंतिन्। अष्टाभिः। आठ कर के॥ सत् शब्दात् ऐठ् शब्दात् इ सूंतिन् प्रत्ययः॥

॥ इतो लोपः ॥ ६ ॥

इकारात् इप्रत्ययस्य लोपो भवति॥ पोथि सूंतिन्। पुस्तिकया। पोथी कर के॥ पूथि शब्दात् इ सूंतिन् प्रत्ययः। पूर्ववर्णोकारस्यौकारः स्त्रियाम् (सू० ३३) इत्यनेन उपधाया ऊकारस्य ओकारः। अनेन इकारलोपः॥

॥ यड्गावूथर्क्कठ्वड्भ्य ऊकारमात्रादेशः ॥ ७ ॥

एभ्यः शब्देभ्यः इप्रत्ययस्य ऊकारमात्रादेशो भवति॥ यंडू सूंतिन्। उदरेण। पेट कर के॥ यड् शब्दात् इ सूंतिन् प्रत्ययः। अनेन इकारस्य ऊकारमात्रादेशः। ऊदन्तत्वे सिद्धे पूर्वस्वरस्याख्यातता ज्ञेया। व्यञ्जनं परेण संधेयम् (सू० ११३) यंडू सूंतिन्। इति सिद्धम्॥ एवं। गोवू (सू०७२) सूंतिन्। गवा। गऊ कर के॥ थंरू सूंतिन्। पृष्ठेन। पीठ कर के॥ कंठू सूंतिन्। कुष्ठेन । कुठ कर के॥ वंडू सूंतिन्। व्याजेन। व्याज कर के॥

॥ उदन्तानां लिङ्गवदेकत्वमेव ॥ ८ ॥

स्पष्टम् ॥ कंरु । कटकः । कडा ॥

॥ स्त्रियामिदूदन्तानाम् ॥ ९ ॥

इकारान्तानामूकारान्तानां च स्त्रियामेकवचनमेव लिङ्गवद्भवति ॥ पूथि । पुस्तिका । पोथी ॥ पंटू । पट्टिका । फट्टी ॥ एकवचनं किम् । पोथ्य । पुस्तिकाः । पोथियाँ ॥ पच्य । पाट्टिकाः । फट्टियाँ ॥ स्त्रियां किम् । बांचू । कुटुम्बजनाः । टब्बर ॥

॥ व्यञ्जनान्तानां च ॥ १० ॥

व्यञ्जनान्तानां स्त्रीलिङ्गानामेकवचनमेव लिङ्गवद्भवति ॥ क्रख् । कोलाहलः । ऊँचा शब्द ॥ क्रक्शब्दस्य । वर्गप्रथमान्तानां प्रथमायां द्वितीय (सू० ६६) इत्यनेन कस्य खः ॥ एकवचनं किम् । क्रक । कोलाहलाः । ऊँचे शब्द ॥

॥ बहुत्वे ऽकारागमः ॥ ११ ॥

व्यञ्जनान्तानाम् [इद्] ऊदन्तानां च स्त्रीलिङ्गानां बहुवचने अकारागमो भवति ॥ [पोथ्य । पुस्तकानि । पोथियाँ ॥] पच्य । पट्टिकाः । फटियाँ ॥ क्रक । कोलाहलाः । ऊँचे शब्द ॥ पंटू शब्दात् अनेन अकारागमे कृते । ऊदन्तटवर्गस्य चवर्गः प्रथमाबहुत्वादिषु स्त्रियाम् (सू०२२) इत्यनेन सूत्रेण टकारस्य चकारे कृते । उवर्णान्तानामिकार (सू०३०) इति ऊमात्राया इकारः । इकारो ऽसवर्णे यो ऽपरलोप (सू० १।१०) इति यत्वम् । अन्यत् स्पष्टम् ॥

॥ न्प्रत्यये सर्वत्र ॥ १२ ॥

सर्वत्र स्त्रीलिङ्गे पुंलिङ्गे च न् प्रत्यये पर अकारागमो भवति ॥ गुर्यन् छुह् खसान् । अश्वानारोहति । घोडियाँ को चढता है ॥ कोर्यन् छुह् रछान् । कन्याः पाति । कूडियाँ को पालता है ॥ कटन् छुह् मारान् । मेषान्हन्ति । भेडुओं को

मारता है ॥ गुरु शब्दात् । द्वितीयायां स्नाव् (सू० ३८) इति न् प्रत्ययः । अनेना-कारागमः । उवर्णान्तानामिकार (सू० ३०) इतीकारः ॥ कूरु शब्दस्य । पूर्ववर्णो-कारस्यौकारः स्त्रियाम् (सू० ३१) इत्यनेनोपधाया ऊकारस्यौकारः । यत्वम् । शेषं पूर्ववत् ॥

॥ नोदन्तानां पुंसि ॥१३॥

ऊकारमात्रान्तानां पुंलिङ्गानां न् प्रत्यये परे अकारागमो न भवति ॥ दांनून् छुह् रुयवान् । करकान् खादति । अनारों को खाता है ॥ लांरून् । इन्द्रवारुणीः । खीरों को ॥ कांन्ज़ून् । काञ्जिकानि [। काँजी] ॥

॥ कृतादेशव्यञ्जनान्तेभ्यश्च ॥ १४ ॥

येषां व्यञ्जनान्तानां लिङ्गानामादेशः कृतो भवति न तु ऊमात्रान्तानां तेषां न् प्रत्यये परे अकारागमो न भवति ॥ रात् । ग्रन्द् । क्रथ् । इति शब्दाः (सू० २३) ॥ रांचून् छुह् परान् । रात्रीः पठति । रात्रियों को पढता है ॥ ग्रंन्ज़ून् छुह् वुछान् । संख्याः पश्यति । गिन्तियों को देखता है ॥ कछून् छुह् वुठान् । [सूत्रतन्तुराशीन् वेष्टयति । लच्छे के सूत बाटता है] ॥ कृतादेशव्यञ्जना-न्तेभ्यः किम् । पच्यन् छुह् गरान् । पट्टिका घटयति । फट्टियाँ को गडता है ॥

॥ वा गंन्ज़ूगांसूबाचूहांन्ज़ूभ्यः ॥ १५ ॥

एभ्यः शब्देभ्यः पुंस्त्वादकारागमो वा विकल्पेन भवति ॥ गंन्ज़ून छुह् मारान् । चर्मकारान्मारयति । चमिआरों को मारता है ॥ गांसून् । [तृणवि-क्रेतॄन् । घसियारों को] ॥ बांचून् छुह् प्यतरान् । कुटुम्बजनान्पाति । कुटुम्ब को पालता है ॥ हांन्ज़ून् छुह् रछान् । नाविकान्पाति । हाँजियों को पालता है ॥ वा ॥ गन्ज़न् । गासन् । हान्ज़न् । बाचन् ॥

॥ कृतादेशानामूमात्रा आगमः ॥ १६ ॥

कृतादेशशब्दस्य पुनर्ग्रहणम् । यत्र यत्र वचने व्यञ्जनान्तानां लिङ्गानामादेशः कृतः स्यात्तत्र ऊमात्रा आगमो भवति ॥ रात् । सत् । कथ् । ग्रन्द् । हान् । इति लिङ्गानि (सू०२३) । रांचू । रात्रयः । रातियाँ ॥ संचू । आशाः । आशाआँ ॥ कंछू । [सूत्रतन्तुराशयः । लच्छे] ॥ ग्रन्ज़ू । संख्याः । गिन्तियाँ ॥ हांसू । हानयः । हानियाँ ॥ ऊमात्रान्तत्वे पूर्वस्वरस्याप्रसिद्धता ॥

॥ यड़ावक्कठ्थर्वडां च कृतादेशविधिः ॥१७॥

एषां शब्दानां च कृतादेशलिङ्गवाद्विधिरागमनिषेधौ भवतः । अकारागमस्य निषेधः ऊमात्रागमस्य विधिः स्यात् ॥ यड्डू । उदराणि । पेटाँ ॥ गोवू (सू०७२) । गावः । गऊआँ । कंठू ॥ कुष्टानि [औषधविशेषः] । कुठाँ ॥ थरू । पृष्ठानि पीठाँ ॥ वड्डू । कलान्तराणि । व्याजाँ ॥

॥ खार्मार्सार्राशादीनां च ॥ १८ ॥

एतदादीनां व्यञ्जनान्तानां स्त्रीलिङ्गानां चाऽकारागमनिषेध ऊमात्रागमश्च भवति ॥ खार् । खारी । खांरू । खार्यः ॥ मार् । नाम नदी । मांरू । नद्यः ॥ सार् । पट्टीभेदः । सांरू । पट्ट्यः ॥ राश् । वणिग्धनम् । रांशू । धनानि ॥

॥ हान्तानां शश्च ॥ १९ ॥

हकारान्तानां स्त्रीलिङ्गानां प्रथमावहुत्वादिष्वऽकारागमनिषेध ऊमात्रागमाभिर्भवति अन्त्यस्य हकारस्य च शकारो भवति ॥ काह् । एकादशी । कांशू । एकादश्यः ॥ बाह् । द्वादशी । बांशू । द्वादश्यः ॥ पाह् । विष्टा । पांशू । विष्टाः ॥ एवं । कांशूव् सूंतिन् । एकादशीभिरित्यादि ॥

॥ ऊकारादौकारस्य वत्वम् ॥ २० ॥

ऊमात्रायाः परस्य औकारस्य सर्वत्र पुंलिङ्गे स्त्रीलिङ्गे च वकारः स्यात् ॥ रांचूव् सूतिन्। रात्रिभिः। रातियों कर के ॥ यंडूव् पुछ्य्। उदरेभ्यः। पेटों वास्ते ॥ दांनूव् सूतिन्। करकैः। अनारों कर के ॥ वांचूव् सूत्य्। कुटुम्बैः। टब्बरों कर के ॥

॥ ऊदितोरकारागमः स्त्रियां सकारे ॥ २१ ॥

ऊकारान्तस्येकारान्तस्य च लिङ्गस्य सकारे परेऽकारागमो भवति स्त्रियाम् ॥ पंटू। तंनू। ह्यटू। पूथि। शब्दाः ॥ पच्य। पट्टिकाम्। फट्टी ॥ तञ्य। तन्वीम्। पतली ॥ ह्च्य। काष्ठम्। लकड़ी ॥ पोथ्य। पुस्तिकाम्। पोथी ॥ द्वितीयायां स्नाव् (सू० ३८) इति स् प्रत्ययः [। स्लोपः स्त्रियां सर्वत्र (सू० ४०) इति सकारस्य। लोपः]। ऊदन्तटवर्गस्य (सू० २२) इति टस्य चः। उवर्णान्तानामिकार (सू० ३०) इति ऊमात्राया इकारः। इकारोऽसवर्णे योऽपरलोप (सू० १।१०) इति यत्वम्। अनेनाकारागमः ॥ पूथि शब्दस्य चानेनाकारागमः। इकारोऽसवर्णे योऽपरलोप (सू० १।१०) इति यत्वम्। व्यञ्जनं परेण संधेयम् (सू० १।३)। पूर्ववर्णोकारस्यौकार (सू० ३३) इत्यूकारस्यौत्वम् ॥

॥ ऊदन्तटवर्गस्य चवर्गः प्रथमाबहुत्वादिषु ॥ २२ ॥

प्रथमाया बहुवचनादिषु ऊमात्रायुतस्य टवर्गस्य चवर्गादेशो भवति स्त्रीलिङ्गे ॥ पंटू। कांठू। बंडू। इति शब्दाः ॥ पच्य छ्यह्। पट्टिकाः सन्ति। फट्टियाँ हैं॥ पच्यन् छुह् गरान्। पट्टिका घटयति। फट्टियों को गडता है॥ पच्य सूतिन्। पट्टिकया। फट्टी कर के॥ काछ्य छ्यह्। शाकादिकाष्ठानि सन्ति। सागों की लकडियाँ हैं॥ काछ्यन् छुह् फुटरान्। काष्ठानि भनक्ति। सागों की लकडियों को तोडता है॥ काछि सूतिन्। शाककाष्ठेन। सागों की लकडी कर के॥ बज्य छ्यह। महत्यः

सन्ति। बडियाँ हैं ॥ बज्यन् छुह् दपान्। महतीर्वदति। बडी इस्त्रियों को कहता है ॥ बज्यौ सूतिन्। महतीभिः। बडी स्त्रियों कर के ॥

॥ तवर्गान्तानामप्रसिद्धः ॥ २३ ॥

तवर्गान्तानां स्त्रीलिङ्गानां क्रमेण अप्रसिद्धः चवर्गादेशो भवति अप्रसिद्धो दन्त्यः ॥ रात्। कथ्। ग्रन्द्। ईरन्। च़ामन्। इति शब्दाः॥ रांचू छ्यह्। रात्रयः सन्ति। रातियाँ हैं॥ रांचून् छुह् निवान्। रात्रीर्हरति। रातियों को लेता है॥ रांचूव् सूतिन्। रात्रिभिः। रातियों कर के॥ कंछू छ्यह् [। सूत्रतन्तुराशयः सन्ति। लच्छे हैं]॥ कंछून् छुह् वुठान् [। सूत्रतन्तुराशीन् वेष्टयति। लच्छों को बाटता है]॥ कंछूव् सूतिन् [। सूत्रतन्तुराशिभिः। लच्छों कर के]॥ ग्रंन्जू छ्यह्। संख्याः सन्ति। गिन्तियाँ हैं॥ ग्रंन्जून् छुह् गंन्ज़्रान्। संख्या गणयति। गिन्तियों को गिनता है॥ एवं। ईरंजू [। स्थूणाः। निहाइयाँ]॥ ईरंजूव् सूतिन् [। स्थूणाभिः। निहाइयों कर के]॥ च़ामंजू [। आमिक्षाः। पनीर]॥ च़ामंजूव् सूतिन् [। आमिक्षाभिः। पनीरों कर के]॥ (सू० १४,१६,२०)॥

॥ न ख्वन्तन्नान्स्वन्हन्बनादीनाम् ॥ २४ ॥

एषां शब्दानां वर्गाक्षरादेशो न भवति॥ ख्वन्। कफोणिः। आरकी॥ ख्वन। कफोणयः। आरकियाँ॥ तन्। तनुः। देह॥ तन। तन्वः॥ तनौ सूत्य्॥ नान्। नाभिः। नाभि॥ नान। नाभयः॥ नानौ सूतिन्॥ स्वन्। सपत्नी। साकन्॥ स्वन। सपत्न्यः। स्वनौ सूतिन्॥ हनि सूतिन्। अल्पेन॥ बनि सूतिन्। पुञ्जेन॥

॥ कथादीनां च ॥ २५ ॥

कथ् [। कथा]॥ वथ् [। मार्गः]॥ व्यथ्। [वितस्ता नाम नदी]॥ लथ् [। लत्ताप्रहारः]॥ दथ् [। लोष्टम्]॥ ब्वथ् [। अन्तरायः]॥ च़्वथ् [। गुदम्]॥ च़ित्थ् [। नाडीस्तम्भः]॥ चैंथ् [। शरीरपरिवर्तनेन क्रीडाविशेषः]॥ ग्रथ् [। नदीप्रवाह

वेगः] ॥ पाँथ् [। लेशः] ॥ ताँथ् [। चञ्चुः] ॥ इति कथादयः ॥ एषां शब्दानां च वर्गाक्षरादेशो न भवति ॥ कथ। कथाः। बाताँ ॥ लत। लत्ताः। लताँ ॥ दत। लोष्टानि [। ढेले] ॥ थ्वत। अन्तरायाः [। विघ्न] ॥ छ्वत। गुदानि। गाँडाँ ॥ चित। नाडीस्तम्भनानि। थंभना ॥ कथौ सूतिन्। कथाभिः ॥ लतौ सूत्य्। लत्ताभिः ॥ दतौ पुछ्य्। लोष्टेभ्यः ॥ थ्वति सूतिन्। अन्तरायेण ॥ छ्वतन् प्यठ्। गुदेषु ॥ चिति सूतिन्। नाडीस्तम्भनेन ॥ चँति सूतिन् ॥ गति सूत्य्। प्रवाहेन ॥ पाँति सूत्य्। अल्पेन ॥ ताँति सूतिन्। चञ्च्वा ॥

॥ टवर्गान्तानां च ॥ २६ ॥

टवर्गान्तानां ऊमात्रारहितानां स्त्रीलिङ्गानां च वर्गादेशो न भवति ॥ नट्। गर्वेठ्। हुड्। इति शब्दाः ॥ नटि सूतिन्। कम्पेन ॥ गर्वेठि पुछ्य्। गृहोपकरणाय ॥ हुडि सूतिन्। हठेन ॥ ऊमात्रारहितानां किम्। च्वेटू। अपूपः ॥ च्वच्य छुह् ख्यवान्। पूपान् खादति ॥ च्वच्यौ सूतिन्। अपूपैः ॥

॥ वालसालज़ालकलां जः ॥ २७ ॥

एषां शब्दानां अन्त्यस्य जकारो भवति स्त्रियाम् ॥ वाल्। सर्पादिबिलम् ॥ साल्। स्थाली ॥ ज़ाल्। जालिका ॥ कल्। चिन्ता ॥ वांजू। बिलानि ॥ सांजू। स्थाल्यः ॥ ज़ांजू। जालिकाः ॥ कंजू। चिन्ताः ॥ वांजूव् सूतिन् ॥ सांजूव् सूतिन् ॥ ज़ांजूव् सूत्य्। कंजूव् सूतिन् ॥ साधनं पूर्ववत् ॥ स्त्रियां किम्। वाल सूतिन् ॥ एषां शब्दानां किम्। गल्। कपोलादधो गलसंज्ञः ॥ गलौ सूतिन् ॥ ज़ालि सूत्य्। कम्पेन।

॥ हालशब्दस्य स्त्रियां समासेऽपि ॥ २८ ॥

हाल् शब्दस्य लकारस्य जकारो भवति स्त्रीलिङ्गवर्तमानसमासपदान्तेऽपि ॥ हाल्। शाला। हांजू किन्य्। शालातः। हांजू प्यठ्। शालोपरि ॥ समासान्ते यथा। स्वरहांजू अंदर्। महानसे ॥ हस्तिहांजू अंदर्। हस्तिशालायां ॥ स्त्रीलिङ्गे किम्। च्राटहालस् अंदर्। पाठशालायाम् ॥

॥ वा कुंडल्कर्तलोः ॥ २९ ॥

कुंडल् कर्तल् इत्यनयोः शब्दयोर्वा विकल्पेन लकारस्य जकारो भवति ॥ कुंडल् । कपालिका । कुंडलि सूंतिन् । कुंडजू सूंतिन् ॥ कर्तल् । खड्गः । कर्तलि सूंतिन् । कर्तजू सूंतिन् ॥

॥ उवर्णान्तानामिकारः ॥ ३० ॥

उकारान्तानां ऊकारान्तानां च लिङ्गानां प्रथमाबहुत्वादिविभक्तिगणे अन्त्यस्वरस्य इकारो भवति ॥ गुरु । घोटकः॥ गुरिस् छुह् खसान् । अश्वमारोहति ॥ एवं । गुर्यन् । गुरि सूंतिन् । इत्यादि । गुरु शब्दात् द्वितीयायां स्नाव् (सू० ३८) इति स् न् प्रत्ययौ । न्प्रत्यये सर्वत्र (सू० १२) इति अकारागमः । अनेन उकारस्य इकारः । यत्वम् ॥ पंटू । पट्टिका । पच्य । पच्यन् । पचि सूंतिन् ॥ प्रथमे । बहुत्वे ऽकारागमः (सू० ११) इति । अपरत्र न्प्रत्यये सर्वत्र (सू० १२) इति अकारागमः । ऊदन्तटवर्गस्य (सू० २२) इति टकारस्य चकारः । अनेन ऊकारस्य इकारः । तृतीये । इतो लोप (सू० ६) इति इप्रत्ययस्य लोपः ॥

॥ नोदन्तानां पुंसि ॥ ३१ ॥

ऊकारान्तानां लिङ्गानां पुंलिङ्गे अन्त्यस्वरस्य इकारो न भवति ॥ दांनू । करकः ॥ दांनू । दाडिमान् । दांनूव् सूंतिन् । दाडिमैः ॥ हांन्जूव् सूंत्य् । नाविकैः ॥ बांचूव् सूंत्य् ॥ कुटुम्बैः ॥ गंन्जूव् सूंत्य् । चर्मकारैः ॥ ऊदन्तानां पुंसि (सू० २) इति बहुवचनं लिङ्गवत् । द्वितीयायां स्नाव् (सू० ३८) इति न् प्रत्ययः । ऊकारादौकारस्य वत्वम् (सू० २०) इति सूत्रेण औ सूंतिन् औ सूंत्य् प्रत्यययोः औकारस्य वत्वम् । पुंसि किम् । व्यछ्यौ सूंतिन् । स्थूलाभिः ॥

॥ व्यञ्जनान्तस्योकारोपधाया अन् ॥३२॥

व्यञ्जनान्तस्य शब्दस्य उपधाभूतस्य उकारस्य प्रथमाबहुत्वादिषु अकारो भवति ॥ वाँदुर् शब्दः । वाँदर् । वानराः ॥ वाँदरौ सूँत्य् । वानरैः ॥

॥ पूर्ववर्णोकारस्यौकारः स्त्रियाम् ॥ ३३ ॥

स्त्रीलिङ्गे वर्तमानस्य पूर्ववर्णसंबन्धिन ऊकारस्य ओकारो भवति प्रथमाबहुत्वादिविभक्तिगणे ॥ पूथि (प्र०ए०)। पुस्तकम् ॥ कूरू (प्र०ए०)। कन्या॥ पोथ्य (प्र०ब०)। पोथ्य (द्वि०ए०) छुह् परान्। पोथि सूँतिन् (तृ०ए०)। पोथ्यौ पुछ्य् (च०ब०)। इत्यादि॥ कोर्य (प्र०ब०)। कन्याः। कोर्य (द्वि० ए०) छुह् रछान्। कोर्यन् (द्वि० ब०)। कोर्यौ सूँत्य् (तृ०ब०)। इत्यादि॥ अनेन पूर्ववर्णोकारस्य ओकारः। साधनं पूर्ववत्॥

अत्र स्थाने ऽन्तरतम [पा० १।१।५०।] इति वचनाद्यथा पूर्ववर्णसंबन्धिन ऊकारस्य ओकारो भवति तथैव ईकारस्य एकारो भवतीति बोध्यम्॥ सीरू। इष्टिका। सेर्य। इष्टिकाः॥ खीति। क्षेत्रम्। खेत्य। क्षेत्राणि॥ इत्यादि॥ गीरादीनां तु न॥ गीरादयस्तु। गीरू [। गैरिकम्]।। गीदू [। अर्भकविष्टा] ॥ चीरि [। चीरिका]॥ टीँठू [। अहंकारः]॥ टीरू [। शीतस्यौदनस्य घनीभूतो राशिः]॥ पीरू [। पीठकम्]॥ इत्यादयः प्रायशो ज्ञेयाः। गीरू। गैरिकम्। गीरि सूँतिन्। गैरिकेण॥ इत्यादीनि स्वरूपाणि भवन्ति॥

॥ बहुषु पुंस्यप्रथमायाम् ॥ ३४ ॥

प्रथमाबहुवचनं वर्जयित्वा पुंलिङ्गे विद्यमानस्य पूर्ववर्णसंबन्धिन ऊकारस्य बहुवचनेषु ओकारो भवति॥ गूरु। गोपः॥ गूलु। फलसारः॥ गोर्यन् (द्वि० ब०)। गोल्यन्। गोर्यौ सूँतिन्। इत्यादि॥ द्वितीयायां न् प्रत्ययः। तृतीयायां औ सूँतिन् प्रत्ययः॥ उवर्णान्तानामिकारः (सू० ३०) न्प्रत्यये सर्वत्र (सू० १२) इत्यकारागमः। अनेनोपधाया ऊकारस्य ओकारः। यत्वम्॥ बहुषु किम्। गूरिस्।

गोपम् ॥ गूलिस् । फलसारम् ॥ अप्रथमायां किम् । गूरि । गोपाः ॥ गूलि । फलसाराः ॥ पुंसि किम् । कोर्य । कन्याः ॥ पोथ्य । पुस्तकानि ॥

॥ न मूलादीनाम् ॥ ३५ ॥

मूल् [। मूलम्]॥ कस्तूरु [। पक्षि-विशेषः] ॥ कूटु [। वृक्षस्तम्भः] ॥ चूँठु [। पालीवतः, सेव् इति भाषायाम्]॥ च्छूल् [। निर्झरः]॥ टूरु [। पात्र-विशेषः, स्त्रीभिर्यस्मिन्नन्नं भुज्यते]॥ डूरु [। पुष्पादिलघुवाटिका]॥ डूस् [। गदा विशेषः]॥ तूरु [। शीतम्]॥ दूरु [। अल्पमार्गः, गलीति भाषायाम्]॥ नस्तूरु [। नस्ततः]॥ बूथ् [। भूतः]॥ मूरु [। अल्पशाखा]॥ रूडू [। वृष्टिः ॥ लूख् [। लोकाः, लोग् इति भाषायाम्]॥ लूद्र् [। लोलुभः]॥ लूब्र् [। लोलुभः]॥ वूँठ् [। उष्ट्रः]॥ सूर् [। भस्म]॥ ह्रूस् [। कोलाहलः]॥ इत्यादयः प्रायशो बोध्याः॥ एषां शब्दानां पूर्ववर्णोकारस्य ओकारो न भवति ॥

मूल् शब्दः ।

	प्र०	द्वि०	तृ०	च०
ए०	मूल् ।	मूलस् वा मूल् ।	मूल सूँतिन् ।	मूल पुछ्य् ।
ब०	मूल् ।	मूलन् वा मूल् ।	मूलौ सूँतिन् ।	मूलौ पुछ्य् ।

	पं०	ष०	स०	आ०
ए०	मूल निश ।	मूलकु ।	मूलस् प्यठ् ।	हा मूल ॥
ब०	मूलौ निश ।	मूलन् हन्दु ।	मूलन् प्यठ् ।	हा मूलौ ॥

॥ व्यञ्जनान्तादकारागमो व्यञ्जने ॥३६ ॥

व्यञ्जनान्तात्पुंलिङ्गात् व्यञ्जने परे अकारागमो भवति ॥ काव् । काकः । काव सन्दु ॥ काव् शब्दात् । स्त्रीसंबन्धैकानेकत्वे स्नौ हन्दु (सू० ४२) इति स् हन्दु प्रत्ययः । पुंप्राणिन (सू०४६) इति ह्रस्य सः ॥ पुंसि संबन्धषष्ठ्यां च (सू० ४१) इति आदिसकारस्य लोपः । अनेन अकारागमः ॥ पुंसि किम् ।

मालि हेन्दु ॥ व्यञ्जनान्तानां किम् । गुरि सेन्दु । अश्वस्य ॥ व्यञ्जने किम् । कावौ सूतिन् । काकैः ॥

॥ स्त्रियामिकारः ॥ ३७ ॥

व्यञ्जनान्तात् स्त्रियां वर्तमानात् लिङ्गात् व्यञ्जने परे इकारागमो भवति । माल् । माला ॥ मालि हेन्दु । मालायाः ॥ माल् शब्दात् । स्त्रीसंबन्धैकानेकत्वे स्नौ हेन्दु (सू० ४२) इत्यादिना स् हेन्दु प्रत्ययः । स्लोपः स्त्रियां (सू० ४०) इति स्लोपः । अनेन इकारागमः । व्यञ्जनान्तात् किम् । पच्य हेन्दु । पट्टिकायाः ॥ व्यञ्जने किम् मालौ सूतिन् । मालाभिः ॥

॥ द्वितीयायां स्नावसंबन्धषष्ठ्यां च ॥ ३८ ॥

स् न् इत्येतौ द्वितीयायाः एकत्वबहुत्वयोः प्रत्ययौ भवतः । संबन्धषष्ठीं वर्जयित्वा षष्ठ्याश्च क्रमेण प्रत्ययौ भवतः ॥ गुरु । घोटकः ॥ गुरिस् छुह् खसान् । अश्वमारोहति ॥ गुर्यन् छुह् रछान् । अश्वान्पालयति ॥ गुरु शब्दात् अनेन स् न् प्रत्ययौ । बहुत्वे । न्प्रत्यये सर्वत्र (सू० १२) इति अकारागमः ॥ उवर्णान्तानामिकार (सू० ३०) इति उकारस्य इकारः । यत्वम् ॥ षष्ठ्यां यथा । ग्वरस् करिज़ि नमस्कार् । गुरोर्नमस्कुर्यात् ॥ द्रब्यन् दिज़ि ज़ादर् । रजकानां बृहतिकां दद्यात् ॥ ग्वर् शब्दात् अनेन स् प्रत्ययः । व्यञ्जनान्तादकारागमो व्यञ्जने (सू० ३६) इति अकारागमः ॥ द्रबु शब्दात् अनेन न् प्रत्ययः । न्प्रत्यये सर्वत्र (सू० १२) इति अकारागमः । उवर्णान्तानामिकारः (सू० ३०) । यत्वम् ॥

॥ वा प्रथमावदसर्वनाम्नः ॥ ३९ ॥

सर्वनामशब्दान् वर्जयित्वा द्वितीयायाः एकत्वबहुत्वे प्रथमावद्वा विकल्पेन

भवतः । द्वितीयाषष्ठीसमुदायवाक्ये तु नित्यं प्रथमावद्भवत इति बोध्यम् ॥ कॆरु छुह् गरान् । वा । करिस् छुह् गरान् । वलयं घटयति ॥ छ़्वच्य छुह् ख्यवान् । वा । छ़्वच्यन् छुह् ख्यवान् । अपूपान्भक्षयति ॥ समुदायवाक्ये यथा ॥ द्वबिस् दिज़ि छ़ादर् । रजकस्य द्वहतिकां दद्यात् ॥ अत्र द्वबिस् इति षष्ठी । छ़ादर् इति द्वितीया । समुदायवाक्यत्वान्नित्यं प्रथमावदेव स्यात् न तु द्वबिस् दिज़ि छ़ादरि इति संभवेत् ॥ असर्वनाम्नः किम् । तमिस् दपिज़ि । तं वदेत् ॥ कमिस् वनि । कं वदेत् ॥ इत्यादि ॥

॥ स्लोपः स्त्रियां सर्वत्र ॥ ४० ॥

सर्वेषां स्त्रीलिङ्गानां सर्वत्र द्वितीयायां षष्ठ्यां च स् प्रत्ययस्य लोपो भवति ॥ मालि छुह् छुनान् । मालां पातयति ॥ मालि हॆन्दु पोष् । मालायाः पुष्पम् ॥ माल् शब्दात् प्रथमे स् प्रत्ययः । स्त्रियामिकार (सू० ३७) इति इकारागमः । अनेन स् प्रत्ययलोपः । अपरत्र स् हॆन्दु प्रत्ययः । शेषं प्रथमवत् सर्वेषां स्त्रीलिङ्गानां बोध्यम् ॥

॥ पुंसि संबन्धषष्ठ्यां च ॥ ४१ ॥

सर्वेषां पुंलिङ्गानां संबन्धषष्ठ्यां स् प्रत्ययस्य लोपो भवति । ग्वर संन्दु छ़ात्र् । गुरोः शिष्यः ॥ ग्वर् शब्दात् । स्त्रीसंबन्ध (सू० ४२) इति स् हॆन्दु प्रत्ययः । अनेन सकारलोपः । पुंप्राणिन (सू० ४६) इति हस्य सः । व्यञ्जनान्ताद् (सू० ३६) इत्यकारागमः ॥ ड्यकुकु । ललाटस्य ॥ ड्यक शब्दात् । अप्राणिना (सू० ४८) इति स् उकु प्रत्ययः । अनेन स्लोपः । असवर्णे ऽकारस्य लोपः (सू० १।४) । संबन्धषष्ठ्यां किम् । ग्वरस् छुह् नमस्कार् करान् । गुरोर्नमस्कारं करोति । साधनं पूर्ववत् ॥

॥ स्त्रीसंबन्धैकानेकत्वे स्नौ हंन्दुन्तावेकत्वे ॥४२॥

पुंलिङ्गानां स्त्रीलिङ्गशब्दस्य एकत्वेन संबन्धे सति संबन्धलिङ्गादेकवचने स् हंन्दु प्रत्ययः स्यात् । बहुत्वेन संबन्धे सत्येकवचने न् हंन्दु प्रत्ययः स्यात् ॥ माज्य हंन्दु न्यचित्रु । मातुः पुत्रः ॥ माज्यन् हंन्दु न्यचित्रु । मातॄणां पुत्रः ॥ न्यचित्रु शब्दस्यैकस्य पुंलिङ्गस्य मांजू शब्देन स्त्रीलिङ्गेन संबन्धात्संबन्धलिङ्गात् मांजू शब्दात् स् हंन्दु प्रत्यय न् हंन्दु प्रत्ययौ । [ऊदितोरकारागमः स्त्रियां सकार (सू० २१) इत्यकारागमः] । स्लोपः स्त्रियां सर्वत्र (सू०४०) इति सकार-लोपः । उवर्णान्तानामिकार (सू० ३०) इत्यनेन ऊमात्राया इकारः । न्प्रत्यये सर्वत्र (सू० १२) इति अकारागमः । यत्वम् ॥

॥ बहुत्वे हंन्द्यन्तौ ॥ ४३ ॥

पुंलिङ्गानां स्त्रीलिङ्गस्यैकत्वेन संबन्धे सति संबन्धलिङ्गादेकवचने स् हंन्दि प्रत्ययः । बहुत्वेन संबन्धे न् हंन्दि प्रत्ययो भवति ॥ माज्य हंन्दि न्यचिवि । मातुः पुत्राः ॥ माज्यन् हंन्दि न्यचिवि । मातॄणां पुत्राः ॥ अत्र न्यचित्रि शब्दस्य बहु-वचनत्वात् मांजू शब्दात् स् हंन्दि न् हंन्दि प्रत्ययौ । स्लोपः । साधनं पूर्ववत् ॥

॥ स्त्रियां हंन्ज़ू अन्तावेकत्वे ॥ ४४ ॥

स्त्रीलिङ्गस्य स्त्रीलिङ्गैकत्वेन संबन्धे सति संबन्धलिङ्गादेकवचने स् हंन्ज़ू प्रत्ययः स्त्रीलिङ्गानेकत्वेन संबन्धे सति न् हंन्ज़ू प्रत्ययो भवति ॥ माज्य हंन्ज़ू कूरू । मातुः कन्या ॥ माज्यन् हंन्ज़ू कूरू । मातॄणां कन्या ॥ अत्रापि कूरू शब्धस्यै-कत्वात्संबन्धलिङ्गात् मांजू शब्दात् स् हंन्ज़ू न् हंन्ज़ू प्रत्ययौ । साधनं पूर्ववत् ॥

॥ बहुत्वे हन्ज़ अन्तौ ॥ ४५ ॥

स्त्रीलिङ्गानां बहुवचने स्त्रीलिङ्गैकानेकत्वसंबन्धतः संबन्धिलिङ्गात् स् हन्ज़

न् हन्ज प्रत्ययौ भवतः ॥ माज्य हन्ज़ कोर्य । मातुः कन्याः ॥ माज्यन् हन्ज कोर्य । मातॄणां कन्याः ॥

॥ पुंप्राणिन एकत्वसंबन्धे हस्य सः सर्वत्र ॥४६॥

पुंलिङ्गस्य प्राणिन एकवचनेन सह संबन्धे सति सर्वत्र स्त्रीलिङ्गे पुंलिङ्गे च हकारस्य सकारो भवति ॥ मा॑लि सन्दु न्यचिवु । पितुः पुत्रः ॥ मा॑लि सन्ज कोर्य । पितुः कन्याः ॥ दान्द सन्दु हंग् । वृषभस्य शृङ्गम् ॥ गुरि सन्दु लंटु । अश्वस्य पुच्छः ॥ प्राणिनः किम् । कनुकु वाल् । कर्णस्य वालः ॥ चाँग्युकु तील् । दीपस्य तैलम् ॥ अथुकु माज़् । हस्तस्य मांसम् ॥ अत्र अथ कन् शब्दयोः प्राणित्वसंभवे ऽपि खण्डप्राणित्वादप्राणित्वमेव । प्राणिनः कर्णे छिन्ने ऽपि न कर्णस्य प्राणिसंज्ञा । नापि छिन्नकर्णेन प्राणिनो ऽप्राणित्वम् ॥ पुंलिङ्गस्य किम् ॥ गोवू हन्दु वंछु । गावो वत्सः ॥ गोवू हन्ज़ू वंछ्रू । गावो वत्सा ॥ कज़ हन्दु प्यंतु । शिलाया अग्रम् ॥ कज़ हन्ज़ू छल् । शिलायाः खण्डम् ॥ माज्य हन्दु मोलु । मातुः पिता ॥ माज्य हन्ज़ू मांज़ू । मातुर्माता ॥

॥ स्वन् रुप् शब्दयोर्वा ॥ ४७ ॥

स्वन् शब्दस्य रुप् शब्दस्य चैकत्वेन संबन्धे सति सर्वत्र स्त्रीलिङ्गे पुंलिङ्गे च विकल्पेन पुंप्राणिवत्स्वरूपं भवति ॥ स्वन सन्दु कंरु । स्वर्णस्य कटकः ॥ रुप सन्दु खोस् । रौप्यस्य कंसः ॥ स्वन सन्ज़ू गंग्ज़ू । स्वर्णस्य गलन्तिका ॥ रुप सन्ज़ू लूर् । रौप्यस्य दण्डः ॥ स्वनुकु छथूर् । स्वर्णस्य छत्रम् ॥ रुपुकु थाल् । रौप्यस्य थालः ॥ स्वनंचू वांज़ू । स्वर्णस्योर्मिका ॥ रुपंचू रज़् । रौप्यस्य रज्जुः ॥

[४७ अत्र मूलपुस्तके रुप् इति पाठः। शुद्धोच्चारणं तु र्वप् इत्यस्ति ॥]

[४७ स्वनुकु छथूर्, रुपुकु थाल्, स्वनंचू वांज़ू, रुपंचू रज़्, अस्मिन्वाक्यचतुष्टये

6194.

॥ अप्राणिना पुंसोकुक्यौ पुंसि ॥ ४८ ॥

प्राणिव्यतिरिक्तस्य पुंलिङ्गस्य एकत्वेन संबन्धे सति पुंलिङ्गात् उकु क्रि क्रमेण भवतः । एकवचने उकु प्रत्ययः बहुवचने क्रि प्रत्ययो भवति ॥ दानुकु त्वमुल् । धान्यस्य तण्डुलः ॥ हारुकु मुंग् । आषाढस्य मुद्गः ॥ कुलिक्रि वथ्र् । वृक्षस्य पत्राणि ॥ मार्गक्रि द्रह् । माघस्य दिवसाः ॥ एकत्वेन किम् । कुलयन् हन्दि वथ्र् । वृक्षाणां पत्राणि ॥ कुलयन् हन्दु वथ्र् । वृक्षाणां पत्रम् ॥ अप्राणिना किम् ॥ काव सन्दु । काकस्य ॥ गोवु हन्दु । गोः ॥

॥ चूचौ च स्त्रियाम् ॥ ४९ ॥

स्त्रीलिङ्गानां प्राणिव्यतिरिक्तस्य पुंलिङ्गस्यैकत्वेन संबन्धे संबन्धिपुंलिङ्गादेकवचने चू प्रत्ययः बहुवचने च प्रत्ययो भवति ॥ कुलिचू लंण्डु । वृक्षस्य शाखा ॥ कुलिच लञ्ज्य । वृक्षस्य शाखाः ॥ नागचू नारिज् । नागस्य प्रणालिका ॥ नागच नारिज । नागस्य प्रणालिकाः ॥ एकत्वेन किम् ॥ कुलयन् हन्ज़ लञ्ज्य । वृक्षाणां शाखाः ॥ नागन् हन्ज़ नारिज । अखातानां प्रणालिकाः ॥ अप्राणिना किम् । गुरि सन्ज़ू ज़ंग् । अश्वस्य जङ्घा ॥ कट सन्ज़ ज़ोर्य । मेषस्य खुराः ॥

॥ मनुष्यसंज्ञयोनुन्यौ पुंसि ॥ ५० ॥

मनुष्यनाम्ना संबन्धे सति पुंलिङ्गे एकत्वबहुत्वयोः उनु नि प्रत्ययौ भवतः ॥ गण इति संज्ञा । गणुनु न्यचिवु । गणस्य पुत्रः ॥ राधाकृष्ण इति नाम ।

सुवर्णाद्भिन्नं छत्रम्, रौप्यस्याधाराद्यर्थं थाली, स्वर्णाद्यर्थं तद्भिन्नोर्मिका, रौप्यस्य बन्धनार्थं तद्भिन्नरूपा रज्जुरित्येवमर्थो विवक्षितश्चेत्तदा मूलपाठः संगच्छते—अन्यथा स्वर्णमयं छत्रम्, रौप्यमयी थाली, स्वर्णमय्यूर्मिका, रौप्यमयी रज्जुरस्मिन्नर्थे, स्वन सन्दु छथ्र्, र्वप सन्दु थाल्, स्वन सन्ज़ू वाज़ू । र्वप सन्ज़ू रज़् इत्येवं रूपाणि शुद्धानि सन्तीति ॥]

राधाकृष्णन्नि गुरि । राधाकृष्णस्याश्वाः ॥ ड्यकुनु बत । ललाटस्य भक्तम् ॥ अत्र ड्यक शब्दस्य दैवार्थकत्वात् उनु प्रत्ययः । अन्यत्र ड्यकुकु रथ् । ललाटस्य रक्तम् ॥

॥ स्त्रियां ञ्ञौ च ॥ ५१ ॥

स्त्रीलिङ्गस्य मनुष्यनाम्ना संबन्धे सति संबन्धिलिङ्गादेकबहुवचनयोः ञ् ञ प्रत्ययौ भवतः ॥ मंनु इति नाम । मनिञ् कूरू । मंनु इत्यस्य कन्या ॥ मनिञ कोर्य । मंनु इत्यस्य कन्याः ॥ कृपाराम इति नाम । कृपारामञ् मांजू । कृपारामस्य माता ॥ कृपारामञ ब्यञ । कृपारामस्य भगिन्यः ॥

॥ सप्तम्यां स्नावन्दर्मन्ज़्प्यठन्तौ स्वार्थभेदतः ॥५२॥

स्नौ प्रत्ययौ । अन्दर् अन्तौ । मन्ज़् अन्तौ । प्यठ् अन्तौ । स्वस्वार्थभेदतः सप्तम्यां प्रत्ययौ भवतः । अन्तरार्थे अन्दरन्तौ । मध्यार्थे मन्ज़न्तौ । उपर्यर्थे प्यठन्ताविति ॥ अन्तर्वाणिभाषायां तु वेषान्तावपि प्रयुज्येते इति निर्णयम् ॥ गरस् अन्दर् । गृहस्यान्तरे ॥ नावि मन्ज़् । नौकाया मध्ये ॥ गरन् अन्दर् । गृहाणामन्तरे ॥ नावन् मन्ज़् । नौकानां मध्ये ॥ गुरिस् प्यठ् । अश्वस्योपरि ॥ गुर्यन् प्यठ् । अश्वानामुपरि ॥ गर शब्दात् स् अन्दर् न् अन्दर् प्रत्ययौ ॥ न्प्रत्यये सर्वत्र (सू० १२) इत्यकारागमः । अकारे ऽकारलोपः (सू० १ । ९ क) । नाव् शब्दात् स् मन्ज़् न् मन्ज़् प्रत्ययौ । स्लोपः सर्वत्र (सू०४०) इति सकारलोपः । स्त्रियामिकार (सू० ३७) इति इकारागमः ॥ गुरु शब्दात् स् प्यठ् न् प्यठ् प्रत्ययौ । उवर्णान्तानामिकार (सू० ३०) इति उकारस्य इकारः । न्प्रत्यये सर्वत्र (सू० १२) इत्यकारागमः । यत्वम् ॥

॥ अधिकरणे क्यथन्तौ ॥ ५३ ॥

स् नौ प्रत्ययौ क्यथ् अन्तावाधारसप्तम्या एकत्वबहुत्वयोः प्रत्ययौ भवतः ॥ थालस् क्यथ् । थाले ॥ नावि क्यथ् । नौकायाम् ॥ थालन् क्यथ् । थालेषु ॥ नावन् क्यथ् । नौकासु ॥

॥ चतुर्थ्यां कितुकिचूअन्तौ पुंस्त्रीकर्मैकतः ॥ ५४ ॥

वाक्येषु पुंलिङ्गैकत्वे कर्मणि सति स् नौ प्रत्ययौ कितु अन्तौ स्त्रीलिङ्गैकत्वे कर्मणि स् नौ किचू अन्तौ चतुर्थ्यामेकत्वबहुत्वयोः प्रत्ययौ भवतः ॥ मालिस् कितु अंनुन् पोञु । पित्रे [तेन] आनीतं पानीयम् ॥ मालिस् किचू अंबून् गाव् । पित्रयानीता गौः ॥

॥ किति किचान्तौ कर्मबहुत्वतः ॥ ५५ ॥

वाक्ये पुंलिङ्गस्य बहुत्वे कर्मणि सति स् नौ प्रत्ययौ किति अन्तौ स्त्रीबहुत्वे कर्मणि सति स् नौ किच अन्तौ चतुर्थ्यां प्रत्ययौ भवतः ॥ गुरिस् किति अंनिन् रव । अश्वायानीताः कम्बलाः ॥ गुर्यन् किति । अश्वेभ्यः ॥ ग्वरस् किच अन्नन् पोथ्य । गुरवे आनीतानि पुस्तकानि ॥ ग्वरन् किच । गुरुभ्यः ॥ अत्रेदं ध्येयम् । कर्मिधातूनां कर्मणः स्त्रीपुंकर्मानुसारतः प्रोक्ताः प्रत्यया विज्ञेयाः । कर्तृधातूनां तु कर्तुः स्त्रीपुंलिङ्गैकवचनबहुवचनानुसारतो बोध्याः ॥ यथा । व्यठनस् कितु आव् । स्थूलीभवनायागतः ॥ व्यठनस् किति आय् । स्थूलीभवनायागताः ॥

॥ कर्तृतृतीयायामिदौतौ ॥ ५६ ॥

तिसृषु कर्तृतृतीयाहेतुतृतीयासहार्थतृतीयासु मध्यात् इदौतौ इ औ

इत्येतौ प्रत्ययौ कर्तृतृतीयाया एकत्वबहुत्वयोः प्रत्ययौ भवतः । अत्रापि पुंलिङ्गे इकारस्यार्धमात्रता बोध्या । स्त्रीलिङ्गे तु पूर्णता विज्ञेया ॥ गुर्रि मोरु । अश्वेन हतः ॥ तमि वंनु । तेन बणितम् ॥ गुर्यौ मोरु । अश्वैर्हतः ॥ तिमौ वंनु । तैर्बणितम् ॥ कोरि दंपु । कन्यया प्रोक्तम् ॥ कोर्यौ दंपु । कन्याभिः प्रोक्तम् ॥

॥ अन्द्रान्तौ निर्धारणे च ॥ ५७ ॥

इ औ प्रत्ययौ अन्द्र अन्तौ निर्धारणे एकत्वबहुत्वयोः प्रत्ययौ भवतः । एकत्वे इ अन्द्र प्रत्ययः । बहुत्वे औ अन्द्र प्रत्ययो भवति ॥ गर अन्द्र छुह् जान् लँाक । गृहे ऽमुकः साधुरस्ति ॥ गरौ अन्द्र छुह् जान् आँगुन् । गृहाणां साध्वङ्गनमस्ति ॥

॥ अकारव्यञ्जनान्तानां पुंस्येकवचने वाऽन ऽसर्वनाम्नाम् ॥ ५८ ॥

चानुकृष्टं नानुवर्तते इति निर्धारण इति निवृत्तम् । पुंलिङ्गानामकारव्यञ्जनान्तानां कर्तृतृतीयाया एकत्वविषये विकल्पेन अन् भवति असर्वनाम्नाम् सर्वनामशब्दान्वर्जयित्वा । तत्रेदानन्तिनभाषायामन्प्रत्यय एव साधुतयोच्चार्यते । इ प्रत्ययविकल्पः प्राचीनभाषयैवेति बोध्यम् ॥ ईश्वरन् दंपु । ईश्वरेणोक्तम् ।

[५७ । गर अन्द्र छुह् जान् लँाक । ईदृशेषु वाक्येषु स्वरे परे ऽपि (सू० ४) उक्तो विधिरिप्रत्ययलोपो ऽवगन्तव्यः ॥ किं चैतद्वाक्यार्थे विवक्षिते प्रायशो गर मन्ज़ छुह् जान् लँाक इत्येवं रूपवाक्यमेवोच्चार्यते इति । एवं गाम अन्द्र इत्यादिष्वपि ज्ञेयम् ॥]

[५८ । ऊमात्रान्तानामपि क्वचित्प्रत्ययादिलोपश्चेष्यते ॥ कर्तृतृतीयाया एकत्वे अन् प्रत्ययस्तदाद्यक्षरस्याकारस्य च लोप इत्यर्थः ॥ दांनून् गन्जून् हांन्जून् इत्यादि ॥]

दायि दपु । ईश्वरेणोक्तम् ॥ ड्यकन् करु । ललाटेन कृतम् ॥ खरन् नचु । खरेण नर्तितम् ॥ अकारव्यञ्जनान्तानां किम् । गुरि वदु । बालेन रुदितम् ॥ पुंसि किम् । जंगि लोयु । जङ्घया क्षिप्तम् ॥ एकवचने किम् । ईश्वरौ दपु । ईश्वरैः प्रोक्तम् ॥

॥ हेतौ सूतिन्नन्तौ सूत्यन्तौ वा ॥ ५९ ॥

इ औ प्रत्ययौ सूतिन् अन्तौ सूत्य् अन्तौ वा हेतुतृतीयायामेकत्वबहुत्वयोः प्रत्ययौ भवतः । अत्र इकारस्य पूर्णता बोध्या ॥ अथ सूतिन् ख्योन् । हस्तेन भुक्तम् ॥ अथौ सूतिन् ख्योन् । हस्तैर्भुक्तम् ॥ श्राकि सूतिन् मोरुन् । छुरिकया हतः ॥ श्राकौ सूतिन् मोरुन् । छुरिकाभिर्हतः ॥ खुर सूत्य् आव् । पादेनागतः ॥ खुरौ सूत्य् गौव् । पादैर्गतः ॥

॥ सहार्थायां स्नौ ॥ ६० ॥

स् न् प्रत्ययौ सूतिन् अन्तौ सूत्य् अन्तौ वा सहार्थतृतीयायामेकत्वबहुत्वयोः प्रत्ययौ भवतः ॥ मालिस् सूतिन् आव् । पित्रा सहागतः ॥ बायिस् सूतिन् म्यूलु । भ्रात्रा साकं संगतः ॥

॥ हेतोः संबन्धषष्ठीकर्तृतृतीययोः प्रयोगलिङ्गात्प्रत्ययौ वा ॥ ६१ ॥

हेतुभूतस्याश्वादेर्यः संबन्धषष्ठीप्रयोगः कर्तृतृतीयाप्रयोगो वा स एव लिङ्गं तस्मात्प्रोक्तौ इ सूतिन् औ सूतिन् प्रत्ययौ वा इ सूत्य् औ सूत्य् प्रत्ययौ हेतुतृतीयाया एकत्वबहुत्वयोर्भवतः । लिङ्गग्रहणं तु तेषां प्रयोगानामागमादेशाद्यर्थम् ॥ गुरि सन्दि सूतिन् आव् । अश्वेनागतः ॥ नावि हन्दि सूत्य् वोतु । नौकया प्राप्तः ॥ महनिव्यन् हन्दि सूत्य् गौव् । पुरुषैर्गतः ॥ गुरि सूत्य् आव् ।

अश्वेनागतः ॥ नावि सूत्य् वोतु । नौकया प्राप्तः ॥ महनिव्यौ सूत्य् गौव् । पुरुषै-र्यातः ॥ गुरि सन्दु शब्दात् इ सूतिन् प्रत्ययः । उवर्णान्तानामिकार (सू० ३०) इत्यनेन सन्दु इत्यस्य उकारस्य इकारः । एवं सर्वेषाम् ॥

॥ खुत निश वा ऽपायपञ्चम्याम् ॥ ६२ ॥

तस्मादेव संबन्धषष्ठीप्रयोगलिङ्गात्तृतीयाप्रयोगलिङ्गाद्वा खुत प्रत्ययो निश प्रत्ययो वा अपायपञ्चम्याः स्वरूपं भवति । निशस्थाने निशिन् इति खुत-स्थाने खुतन् इति च व्यवह्रियत इति बोध्यम् ॥ ग्वर सन्दि खुत छुह् गाटुलु । गुरोः सकाशाद्दक्षो ऽस्ति ॥ यद्वा । कञ्ज हन्दि खुत छुह् त्रकुरु । शिलायाः कठि-नो ऽस्ति ॥ रुप निश छुह् स्वन् जान् । रौप्यात्स्वर्णं साध्वस्ति ॥ यद्वा । रुपौ खुत छिह् द्यार् जान् । रौप्याद्धनं शुभमस्ति ॥

॥ सामान्यचतुर्थ्यां पुछ्य् ॥ ६३ ॥

संबन्धषष्ठीप्रयोगलिङ्गात्तृतीयाप्रयोगलिङ्गाद्वा चतुर्थ्यां पुछ्य् प्रत्ययः स्यात् । एकबहुत्वे लिङ्गादेव बोध्येते ॥ पुत्र पुछ्य् आव् । पुत्रायागतः ॥ यद्वा । पुत्र सन्दि पुछ्य् । पुत्राय ॥ पुत्रौ पुछ्य् आव् । पुत्रेभ्य आगतः ॥ यद्वा । पुत्रन् हन्दि पुछ्य् । पुत्रेभ्यः ॥

॥ उकुप्रत्ययस्योकारस्याऽकारः ॥ ६४ ॥

षष्ठीप्रयोगसंबन्धिन उकु प्रत्ययोकारस्य अकारः स्यात् ॥ पष्मकि पुछ्य् । और्णवस्त्राय ॥ पष्मुकु प्रयोगलिङ्गात्पुछ्य् प्रत्ययः । अनेन उकारस्य अकारः । उवर्णान्तानाम् (सू० ३०) इति इकारागमः ॥

॥ पञ्चम्यामिदौतौ प्यठान्तौ निशान्तावन्द्रान्तौ वा ॥६५॥

लिङ्गात् इ औ प्रत्ययौ प्यठ अन्तौ वा निश अन्तौ वा अन्द्र अन्तौ पञ्च-म्या एकत्वबहुत्वयोः प्रत्ययौ भवतः। ते च स्वस्वस्थानेषु प्रयुज्यन्ते॥ गाम प्यठ। ग्रामात्॥ सर्प निश। सर्पात्॥ गामौ प्यठ। ग्रामेभ्यः॥ सर्पौ निश। सर्पे-भ्यः॥ गर अन्द्र द्राव्। गृहान्निर्गतः॥ नावि अन्द्र द्राव्। नावो निर्गतः॥

॥ वर्गप्रथमान्तानां प्रथमायां द्वितीयः ॥६६॥

वर्गप्रथमान्तानां लिङ्गानां प्रथमाविभक्तौ स्वस्ववर्गसंबन्धी द्वितीयाक्षरो भवति॥ त्रख्। द्रोणः॥ काछ्। काचः॥ कठ्। मेषः॥ त्रख्। द्रोणाः॥ काछ्। काचाः॥ कठ्। मेषाः॥ हथ्। शतम्॥ हथ्। शतानि॥ ताफ्। आतपः॥ ताफ्। आतपाः॥ प्रथमायां किम्। त्रक सूतिन्। द्रोणेन॥ कात्र सूतिन्। यक्ष्मणा॥ कट पुछ्य्। मेषाय॥ हतुकु। शतस्य॥ तापस् प्यठ्। आतपोपरि॥

॥ स्त्रियामेकवचन एव ॥ ६७ ॥

स्त्रीलिङ्गे वर्तमानस्य वर्गप्रथमान्तस्य प्रथमाया एकवचने एव स्वस्ववर्ग-द्वितीयाक्षरो भवति॥ क्रख्। कोलाहलः॥ रछ्। गुञ्जा॥ नठ्। कम्पः॥ वथ्। मार्गः॥ त्राफ्। भुक्तिः॥ एकवचने किम्। क्रक। कोलाहलाः॥ रच़। गुन्जाः॥ नट। कम्पाः॥ वत। मार्गाः॥ त्राप। भुक्तयः॥ एवं। द्वितीयादिविभक्तिषु बोध्यम्॥

॥ न संयोगे तचोः ॥ ६८ ॥

लिङ्गान्ते पूर्ववर्णसंयुक्तयोस्तकारच़कारयोर्द्वितीयाक्षरादेशो न भवति॥

[६१। गर अन्द्र। अत्रापि (सू० ९७) लिखितसंकेतो (नोट्) द्रष्टव्यः॥

सञ् । सौचिकः ॥ वत्च । वर्तिका ॥ व्वक्ञ् । बाला शुनी ॥ मक्ञ् । परशुः ॥ मस्त् । शिरोरुहः ॥ नस्त् । नासिका ॥ तत्रोः किम् । रेम्फ् । अल्पार्थः ॥ ञाम्फ् । सान्त्रम् ॥ संयोगे किम् । रथ् । रक्तम् ॥ ऋछ् । उपजातिः ॥

॥ उदन्तानामोदुपधाया आत्वमप्रथमैकत्वे ॥६९॥

प्रथमैकवचनं वर्जयित्वा उदन्तानामुकारान्तानां लिङ्गानामुपधाभूतो य ओकारस्तस्य आत्वं भवति शेषासु विभक्तिषु । तत्रादेशागमादिना इकारान्तीभूतस्थाने उपधाया वक्ष्यमाणसूत्रेण (सू० ७०) अप्रसिद्धता विज्ञेया ॥ मा॒लि । पितरः ॥ मालिस् । पितरम् ॥ मा॒लि सन्दु । पितुः ॥ बा॒लि । कुण्डलानि ॥ बालिस् । कुण्डलम् ॥ बा॒लि दंपु । कुण्डलेनोक्तम् ॥ बा॒यि । भ्रातरः ॥ बायिस । भ्रातरम् ॥ बा॒गि सन्दु । भ्रातुः ॥ मोलु । वोलु । बोयु शब्देभ्यः । उवर्णान्तानामिकार (सू० ३०) इति सूत्रेण उमात्राया इकारमात्रादेशः । अनेनोपधाया ओकारस्य आत्वम् । उदन्तानां किम् । पोष् । पुष्पाणि ॥ पोष सूंतिन् । पुष्पेण ॥

॥ इदुदूदन्तानामवर्णाप्रसिद्धता ॥ ७० ॥

इमात्रान्तानामुमात्रान्तानामूमात्रान्तानां च लिङ्गानां शब्दानां चोपधाया अवर्णस्याप्रसिद्धता निर्णेया । उदाहरणानि पूर्वसूत्रोक्तानि (सू० ६९) । अन्यान्यपि यथा ॥ पंटु [। और्णवस्त्रम्] ॥ हंटु [। कण्ठः] ॥ तंतु [। तनुः] ॥ इत्यादीनां शब्दानां स्वयमुकारमात्रान्तत्वादुपधाया अकारस्याऽप्रसिद्धता । एषामेव शब्दानाम् । उवर्णान्तानाम् (सू० ३०) इत्यादिसूत्रेण बहुत्वविषये उकारस्य इकारे कृते इकारान्तीभूतत्वात्तत्राप्यप्रसिद्धता ॥ पंटि । हंटि । तंनि ॥ ऊमात्रान्तानां यथा ॥ मांजू

[७० । येषां शब्दानां पूर्वसूत्रेण (६९) उपधाभूतस्यौकारस्याकारः कृतस्तेषामेव तस्योपधाकारस्य द्वितीयैकत्वे ऽप्रसिद्धता विज्ञेया । यथा । मालिस् बायिस् इत्यादि । नत्वन्येषामिदुदूदन्तानाम् । यथा । पाटिस् कारिस् इत्यादि ॥]

[। माता] ॥ कांठू [। काष्ठम्] ॥ अत्र स्वयमूमात्रान्तत्वादप्रसिद्धता। बहुत्वे तु। बहुत्वे ऽकारागम (सू०११) इति सूत्रेणाकारागमे कृते । ऊदन्तटवर्गस्य (सू० २२) इत्यादिना ठकारस्य छकारे च कृते । उवर्णान्तानामिकारः (सू०३०) इत्यूकारस्य इकारः यत्वे च कृते उपधाया अकारस्य प्रसिद्धता सिद्धा इति [। माज्य । काछ्य] ॥

॥ ज़ाम ओत्वं परस्वरलोपश्च ॥ ७१ ॥

ज़ाम् शब्दस्योपधाया ओत्वं भवति तस्मात्परस्य प्रत्ययागमादिजस्य स्वरस्य च लोपः स्यात् अप्रथमैकत्वे ॥ ज़ोम् । ननन्दरः ॥ ज़ोम् वन् । ननन्दरं वद ॥ ज़ोम्न् । ननन्दॄः ॥ ज़ोम् दपु । ननन्द्रोक्तम् ॥ ज़ोम्व् । ननन्दृभिः ॥ ज़ोम् हन्दु । ननन्दुः ॥ इत्यादि ॥

॥ गाव् शब्दस्यौकारः ॥ ७२ ॥

गाव् शब्दसंबन्धिन उपधाया आकारस्य ओकारो भवति प्रथमैकवचनं वर्जयित्वा ॥ गोव् । गावः । गोव्न् । गावः ॥ गोव् हन्दु । गोः ॥ गाव् शब्दात्सर्वत्रानेनोपधाया ओकारे कृते । यङ्गावकठ्थवडां च कृतादेशविधि (सू० १७) रिति सूत्रेण अकारागमनिषेधः ॥

॥ उदन्तत्र्यक्षराणामुकारस्याकारः ॥ ७३ ॥

उदन्तानां त्र्यक्षरादीनां लिङ्गानामुपधाभूतस्य उकारस्य अकारो भवति प्रथमैकवचनं वर्जयित्वा ॥ गाटलिस् । दक्षम् ॥ गाटलयन् । दक्षान् ॥ गाटल्यौ । दक्षैः ॥ गाटलिस् प्यठ । दक्षात् ॥ गाटुलु शब्दात् । द्वितीयायां स्नौ (सू०३८) स् न् प्रत्ययौ । उवर्णान्तानामिकारः (सू०३०) । न्प्रत्यये सर्वत्र (सू० १२) अकारागमः । अनेनोपधाया अकारः । त्र्यक्षराणां किम् । कुलिस् । वृक्षम् ॥ कुल्यन् । वृक्षान् ॥

॥ न कूछ़लादीनां शेषं कर्म ॥ ७४ ॥

कछ़ुलु । च़्वतुलु । च़कुलु । ग्वगुलु । वातुलु । बतुकु । गगुरु । म्वंगुरु । इत्यादयः ॥ एषां शब्दानामुकारान्तलिङ्गशेषक्रिया न भवति किंतु उपधाया अकारादेशो भवति ॥ कछ़ल् । भारिकाः ॥ च़्वतल् । स्वव्यभिचारकारयितारः ॥ च़कल् । चक्राकाराः ॥ ग्वगल् । वर्तुलाकाराः ॥ वातल् । चण्डालाः ॥ बतक् वर्तकाः ॥ गगर् । मूषकाः ॥ म्वंगर् । छागपोताः ॥

॥ इकारे लोपः ॥ ७५ ॥

त्र्यक्षराधिकानामुकारान्तानामिकारे परे उपधाया उकारस्य लोपो भवति ॥ गाट्लि । दक्षाः ॥ गाट्लि् वंनु । दक्षेणोक्तम् ॥ गाट्लि सन्दि पुछ्य् । दक्षाय ॥ गाट्लि संन्दु । दक्षस्य ॥ साधनं पूर्ववत् ॥ इकारे किम् । गाटलिस् । दक्षम् ॥ साधितचरमेव ॥

॥ युकारोपधाया इत् ॥ ७६ ॥

उकारान्तानां लिङ्गानामुपधाभूतस्य युकारस्य इत् भवति । प्रथमैकवचनं वर्जयित्वा ॥ ज़िठि । वृद्धाः ॥ ज़िठिस् । वृद्धम् ॥ ज़्युठु शब्दात् । उवर्णान्तानाम् (सू० ३०) इत्यनेन इकारे कृते । अनेन यु उपधाया इत्वम् ॥

[७६।७९ ॥ महन्युवु । महनिवु ॥ न्यच्युवु । निचिवु ॥ क्युतु । कितु ॥ ज़्युठु । ज़िठु ॥ इत्यादयः शब्दा उभयरूपेणात्र लिखिता अपि प्रथमरूपेणैव महन्युवु इत्याद्यात्मकेन शुद्धोच्चारणाः संगताश्चावगन्तव्याः ॥]

॥ यूकारस्येसोरीत् ॥ ७७ ॥

उकारान्तानां लिङ्गानाम् इ स् इत्येतयोः परयोरुपधाया यूकारस्य ईकारो भवति ॥ च्नीनि । भित्तयः ॥ च्नीनिस् । भित्तिम् ॥

॥ शेषेष्वेकारः ॥ ७८ ॥

उकारान्तानां यूकारोपधायाः शेषप्रत्ययेषु एकारो भवति ॥ च्नेन्यन् । भित्तीः ॥ च्नेन्यौ सूतिन् । भित्तिभिः ॥ च्नेन्युक् । भित्तेः ॥ च्नेन्यन् प्यठ् । भित्तिषु ॥ साधनं पूर्ववत् ॥

॥ न गुरुत्वं ह्रस्वस्य संयोगे ॥ ७९ ॥

संयोगे परे पूर्ववर्णसंबन्धिनो ह्रस्वस्य गुरुत्वं नोच्चार्यते इति परिभाष्यते ॥ महन्युव् । पुमान् ॥ अत्र हकारसंबन्धिनः अकारस्य न गुरुत्वम् । एवं सर्वत्र विज्ञेयम् ॥

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
लिङ्गप्रकरणे लिङ्गपादः प्रथमः ॥ २ । १ ॥

[७७ । न्यूलु शब्दस्य सर्वत्र ॥ सर्वेषु प्रत्ययेषु परेषूपधाया ईकारो विधेय इत्यर्थः । नील्यन् । नील्यौ सूतिन् । इत्यादि ॥]

अथ लिङ्गप्रकरणं ॥२॥

संबुद्धिपादः ॥२॥

॥ आमन्त्रणे ॥१॥

इत उत्तरं ये प्रत्ययास्त आह्वाने विज्ञातव्याः ॥

॥ पुमादराह्वाने विशिष्टान्नाम्नो वा पूर्वं हे ॥२॥

पुंसा पुरुषस्यादरेण संबोधने कर्तव्ये जात्यादिना जुव् शब्दादिना विशि-ष्टान्नाम्नो वा शब्देन केवलान्नाम्नो वा पूर्वं हे शब्दः प्रयोज्यः ॥ हे नारान् जुव् ॥ हे गण कौल् ॥

॥ अन्ते सा प्रत्ययश्च ॥३॥

तस्मादेव हे-शब्दपूर्वाद्विशिष्टात्केवलान्नाम्नो वा आदरसंबोधनविषये सा प्रत्ययो भवति ॥ हे नारान् जुव् सा ॥ हे राम कौल् सा ॥ हे नारान् सा ॥

॥ हतसाहे पूर्वं वा ॥४॥

तस्मादेव विशिष्टात्केवलाद्वा नाम्नः हतसाहे शब्दः वा पूर्वं प्रयोज्यः । तकारः सर्वत्र विकल्पेन बोध्यः ॥ हतसाहे नारान् जुव् ॥ हतसाहे राम कौल् ॥ वा । हतसाहे नारान् जुव् सा ॥ हतसाहे राम कौल् सा ॥ विकल्पे तु ॥ हसाहे

नारान् जुव्। इत्यादि ॥ केवलान्नाम्नस्तु सा प्रत्ययो ऽवश्यं प्रयोज्यः ॥ हत-साहे गण सा ॥ हतसाहे गण इति न भवति ॥

॥ बा प्रत्ययः पुरोहितसामान्यदासेषु ॥५॥

पुरोहितस्य श्राद्धादिकारयितुः सामान्यजनस्य दासस्य च संबोधने कर्तव्ये केवलान्नाम्नो बा प्रत्ययो भवति हे शब्दश्च पूर्वं प्रयोज्यः ॥ हे नारान् बा ॥ केवलान्नाम्नः किम् ॥ हे गण ब्रेठ् बा। इति तु न भवति। ब्रेठ् अत्र जातिर्विज्ञेया ॥

॥ हतसाहे पूर्वं वा वृद्धेषु ॥६॥

तेषु पुरोहितादिषु वृद्धेषु सत्सु हतसाहे पूर्वं प्रयोज्यः। वा शब्दात् हत-बाहे च ॥ हतसाहे सहज् बा ॥ हतबाहे ज़न बा ॥

॥ आ प्रत्ययः कनिष्ठनीचयोः ॥७॥

कनिष्ठस्य नीचस्य च संबोधने कर्तव्ये विशिष्टात्केवलान्नाम्नो वा आ प्रत्ययः स्यात् ॥

॥ हताशब्दः पूर्वं च ॥८॥

स्पष्टम् ॥ हता माना ॥ हता मान कौला ॥ हता गुल्या ॥ तृतीयस्यात्र गुलु शब्दस्योकारान्तत्वादुवर्णान्तानामिकार (सू० २।१।३०) इत्यनेन सूत्रेण इकारः। यत्वम् ॥ व्यञ्जनं परेण संधेयम् (सू० १।३)। इत्थं पुंलिङ्गानां स्त्रीलिङ्गानां च यत्किंचिद्द्वितीयादिष्वागमादिकमभिहितं तत्सर्वं संबोधने चावधार्यम् ॥

॥ हा दूरविषादयोराप्रत्ययस्य चोकारः ॥९॥

स्पष्टम् ॥ हा नारानो ॥ हा काको ॥

॥ हतो वा ॥१०॥

नाम्नः पूर्वं दूरतो विषादतो वा संबोधने विधेये सति हतो शब्दः पूर्वं वा प्रयोज्यः ॥ हतो पर्यो ॥

॥ मांजू प्रत्ययो वृद्धास्त्रियो नाम्नः ॥११॥

पुरुषेण वृद्धाया ज्येष्ठायाः स्त्रियाः संबोधने कर्तव्ये केवलान्नाम्नो मांजू प्रत्ययो भवति ॥

॥ बिञ् सामान्यायाः ॥१२॥

सामान्यायास्तुल्यायाश्च स्त्रिया आह्वाने बिञ् प्रत्ययः अग्रे प्रयोज्यः ॥

॥ हतपूर्वौ पूर्वे च ॥१३॥

तौ मांजू बिञ् प्रत्ययौ हतशब्दः पूर्वो ययोस्तथाविधौ पूर्वं च प्रयोज्यौ ॥ हतमांजू पार्वत् मांजू ॥ हतबिञ् सरस्वत् बिञ् ॥ वा। हताबिञ् पार्वत् मांजू ॥

॥ य् प्रत्ययः कनिष्ठनीचयोः ॥१४॥

पुरुषेण कनिष्ठाया नीचाया वा संबोधने कर्तव्ये नाम्नः य् प्रत्ययो भवति। तत्र नीचायां वृद्धायां सत्यां पूर्वप्रयुक्तप्रत्ययादग्रे वा प्रयोज्यः ॥

॥ हा हत हतां पूर्वः पूर्वे च ॥१५॥

स एव य् प्रत्ययः हापूर्वो हतपूर्वो हतांपूर्वो वा नाम्नः पूर्वं प्रयोज्यः ॥ हाय् वव्हरिय् ॥ हतय् वव्हरिय् ॥ हतांय् वव्हरिय् ॥

॥ स्त्रियादराहूते पुंनाम्नो वा प्रत्ययः ॥१६॥

स्त्रिया पुरुषस्यादरेणाह्वाने कर्तव्ये पुंनाम्नो वा प्रत्ययो भवति ॥ तत्र प्रायः पुरोहितादिष्वेवाऽऽ प्रयुज्यते ॥

॥ औ प्रत्ययः प्रियकनिष्ठयोः ॥१७॥

स्पष्टम् ॥

॥ हतपूर्वौ पूर्वं च ॥१८॥

तौ वा औ प्रत्ययौ हतपूर्वौ हत शब्दः पूर्वं ययोस्तथाविधौ पूर्वं च प्रयोज्यौ॥ हतवा हिमत् वा ॥ हतौ हिमत् कोलौ ॥ हतवा काकौ ॥ हतौ काकौ ॥

॥ अ वा ॥१९॥

नाम्नः अग्रे अप्रत्ययो वा प्रयोज्यः ॥ हतवा काक ॥ हतौ गण ॥

॥ बाय बायौ सामान्यसंज्ञायाश्च ॥२०॥

सामान्यसंज्ञाया लोकेषु ख्यातायाः परौ बाय बायौ वा प्रयोज्यौ ॥ हत वा महादेव बाय ॥ हतौ महादेव बायौ ॥ सामान्य संज्ञायाः किम् । हत बा काक बाय । इति न भवति ॥ काक् शब्दस्य पित्रादिष्वेव विशिष्टत्वात् ॥

॥ दूरे पूर्वं हतोव् च ॥२१॥

स्त्रिया पुरुषस्याह्वाने दूरतः कर्तव्ये हतोव् शब्दः पूर्वं प्रयोज्यः ॥ हतोव मनसा रामौ ॥

॥ पत्याह्वाने म्लेच्छयापि ॥२२॥

म्लेच्छस्त्रिया भर्तुराह्वाने कर्तव्ये नाम्नो हतोव् शब्दः प्रयुज्यते ॥

॥ ब्राह्मण्यां पतिसंबोधनाभावः ॥२३॥

॥ केवलो हतशब्दः क्वचिन्नैकट्ये ॥२४॥

क्वचिद्विविक्ते निकटस्थस्य भर्तुराह्वाने कर्तव्ये नामजात्यादिरहितः केवलो हतशब्दः प्रयुज्यते ॥

॥ स्त्रीसंबोधने पुंवत् ॥२५॥

स्त्रिया स्त्रियः संबोधने कर्तव्ये पुंवत् प्रत्यया भवन्ति ॥ यथा पुरुषेण स्त्रीसंबोधनं क्रियते तथैव स्त्रियापीत्यर्थः ॥

॥ अङ्गीकारे संबोधनमुख्यप्रत्यया आहन्शब्दात्परा उक्त्युपक्रमे ॥२६॥

अङ्गीकारे कर्तव्ये प्रोक्ताः संबोधनस्य मुख्याः प्रत्यया उक्तेरारम्भे आहन् शब्दात्परे प्रयोज्याः ॥ आहन्सा ॥ आहन्बा ॥ आहनो ॥ आहन् मांजू ॥ आहन् बिञ् ॥ आहनिय् ॥ आहनू ॥ आहनुव् ॥

॥ हपूर्वाश्च केवलक्रियाया अन्ते ॥२७॥

केवलक्रियाया अङ्गीकारे कर्तव्ये ते सा आदिप्रत्यया हपूर्वाः केवलक्रियायाश्चान्ते प्रयोज्याः ॥

॥ वर्तमानायां प्रत्ययादावेव ॥२८॥

वर्तमानायां विभक्तौ ते हपूर्वाः सा आदि प्रत्ययाः प्रत्ययात्पूर्वं प्रयोज्याः ॥ आहन्सा करान् हसा छुह् ॥

॥ तदभावे नपूर्वाः ॥२९॥

तस्याङ्गीकारस्याभावे सति नपूर्वा वाक्यारम्भे क्रियान्ते च प्रयोज्याः ॥ नबा करान् नबा छुह् ॥ एवमन्यत् ॥

॥ कर्मयुक्तायाः कर्मान्ते ॥३०॥

कर्मयुक्तायाः क्रियाया अङ्गीकारे अभिधेये सति वाक्यारम्भे आहन्सा आदयो भवन्ति कर्मान्ते तु हसा आदयो भवन्ति ॥ आहन्सा वत हसा छुह् रनान् ॥

॥ कर्तृयुक्तायाः कर्तुरन्ते च ॥३१॥

कर्तृकर्मयुक्तायाः क्रियायाः अङ्गीकारे गम्यमाने वाक्यारम्भे आहन्सा आदयः प्रयोज्याः कर्तुरन्ते हसा आदयो भवन्ति ॥ आहन्सा नारान् हसा छुह् पुथि परान्॥ आहन्बा रामहबा छुस् न्यन्दूर् करान्॥ इत्यादयो बुद्धिमता स्वयमूह्याः ॥

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
लिङ्गप्रकरणे संबुद्धिपादो द्वितीयः ॥२॥२॥

अथ लिङ्गप्रकरणं ॥२॥

सर्वनामपादः ॥३॥

॥ तिह् यिह् क्याह् इह् हुह् शब्दाः पुंस्यप्राणिनि ॥१॥

प्राणिव्यतिरिक्तानां तदादीनां पुंसि तिह् आदयः शब्दा भवन्ति ॥ तद् शब्दस्य तिह् । यद् शब्दस्य यिह् । किम् शब्दस्य क्याह् । इदम् शब्दस्य इह् । अदस् शब्दस्य हुह् शब्दो बोध्यः ॥ प्रथमैकवचनं सर्वत्र लिङ्गवदेव ज्ञेयम् ॥

॥ सुह् युस् कुस् इह् हुह् शब्दाश्च प्राणिनि ॥२॥

प्राणिनां मनुष्यादीनां तदादिशब्देषु सुह् आदिशब्दा अवधार्याः ॥ सुह् । सः ॥ युस् यः ॥ कुस् । कः ॥ इह् । अयम् ॥ हुह् । असौ ॥ अत्राप्येकवचनं लिङ्गवत् ॥

॥ उकारोपधायाः स्त्रियां वत्वमप्राणिनि च ॥३॥

प्राणिनां स्त्रीलिङ्गानां तदादिशब्देष्वभिधेयेषु सुह् आदिशब्दानामुपधाभूतो य उकारस्तस्य वत्वं भवति अप्राणिनि स्त्रीलिङ्गे च ॥ स्वह् । सा । वा स । सा ॥ ह्वह् । असौ ॥

॥ युस्कुसोरन्त्यस्य द्वित्वमकारागमश्च ॥४॥

युस् कुस् इत्येतयोः शब्दयोः स्त्रियामन्त्यस्य द्वित्वं भवति अकारागमश्च ॥ य्वस्स । या ॥ क्वस्स । का ॥

॥ उभयेषां तम् यम् कम् इम् हुमो द्वितीयाद्येकवचनेषु ॥५॥

उभयेषां प्राणिवाचिनामप्राणिवाचिनां च तिहादिशब्दानां द्वितीयादीनामेकवचनेषु क्रमेण तम् आदय आदेशाः स्युः ॥ तमिस् । तम् ॥ यमिस् । यम् ॥ कमिस् । कम् ॥ इमिस् । इमम् ॥ हुमिस् । अमुम् ॥ सुह् शब्दादिभ्यो द्वितीयायां स्नाव् (सू० २।१।३८) इत्यादिना स्प्रत्ययः । स्प्रत्यय इकारागम (सू० १७) इति इकारागमः । अनेन तम् आदय आदेशाः ॥ केषांचिन्मते इह् शब्दस्य न्वम् आदेशो भवति । तन्मते । न्वमिस् । एनम् । इति स्वरूपं भवति ॥

॥ अन्त्यस्य वा ऽमिसोः ॥६॥

अन्त्यस्य हुह् शब्दस्य इकारसकारयोः परयोर्विकल्पेन अम् आदेशः स्यात् ॥ अमिस् । अमुम् ॥ अमि । अमुना ॥ इसोः किम् । हुमौ । अमीभिः ॥

॥ अप्राणिनि स्प्रत्ययलोपस्तकारादेशश्च ॥७॥

अप्राणिनि अभिधेये सति तम् आदीनां स् प्रत्ययलोपो भवति । अन्त्यस्य च तकारादेशः स्यात् ॥ तथ् छुह् च्रटान् । तच्छिनत्ति ॥ यथ् । यत् ॥ कथ् । किम् ॥ इथ् । इदम् ॥ हुथ् । अदः ॥ तिह् आदिशब्देभ्यो । द्वितीयायां स्नाव् (सू० २।१।३८) इति स्प्रत्ययः । उभयेषाम् (सू० ५) इत्यादिसूत्रेण तम् आदय आदेशाः । अनेन स्प्रत्ययलोपः अन्त्याक्षराणां तकारः । वर्गप्रथमान्तानाम् (सू० २।१।६६) इति सूत्रेण तस्य थः ॥

॥ चूह्ब्वहोश्च्यम्यौ च ॥ ८ ॥

त्वम् अहम् इति शब्दवाचकयोः चूह् ब्वह् शब्दयोर्द्वितीयादीनामेकवचनेषु क्रमेण च्य म्य आदेशौ भवतः स्मत्ययलोपश्च ॥ च्य छुह् वनान् । त्वां वदति ॥ चूह् शब्दाद्द्वितीयायां स्नाव् (सू० २।१।३८) इति स्मत्ययः । अनेन च्य आदेशः स्मत्ययलोपश्च । एवमन्यत् ॥

॥ प्रत्ययस्य लोपो द्वितीयाकर्तृतृतीययोः ॥९॥

चूह् ब्वह् इत्येताभ्यां शब्दाभ्यां द्वितीयायां कर्तृतृतीयायां च प्रत्ययस्य लोपः स्यात् ॥ च्य छुह् वनान् । त्वां वदति ॥ त्वह्य छुह् वनान् । युष्मान् वदति ॥ च्य वनुथ् । त्वया प्रोक्तम् ॥ त्वह्य वंनुव । युष्माभिः प्रोक्तम् ॥

॥ सश्च ॥ १० ॥

चूह् ब्वह् शब्दाभ्यां स् इत्यस्य लोपो भवति चशब्दात्कर्तृतृतीयासंबन्धिनोः इ औ प्रत्यययोश्च लोपः स्यात् ॥ च्य सूतिन् । त्वया सह ॥ म्य सूत्य् । मया सह ॥ चूह् ब्वह् शब्दाभ्याम् इ सूतिन् प्रत्ययः । चूह्ब्वहोश्च्यम्यौ च (सू० ८) इति सूत्रेण च्य म्य आदेशौ । प्रत्ययस्य लोप (सू० ९) इत्यनेन इकारस्य लोपः । अनेन स् लोपः ॥

॥ षष्ठ्यामन्त्यस्वरस्य च्यस्ख्यातत्वं च ॥११॥

चूह् ब्वह् शब्दाभ्यां षष्ठ्यामन्त्यस्वरस्य लोपो भवति च्यसंबन्धिनश्चकारस्य ख्यातत्वं च स्यात् ॥ च्योनु । तव ॥ म्योनु । मम ॥ चूह् ब्वह् लिङ्गाभ्यां मनुष्यसंज्ञयोनु (सू० २।१।५०) इति उनु प्रत्ययः । चूह्ब्वहोश्च्यम्यौ च (सू० ८) इति च्य म्य आदेशौ । अनेन अकारलोपः । प्रत्ययादेरोत्पुंसि (सू० १३) इत्युकारस्यौकारः । चकारस्य च ख्यातता बोध्या ॥

॥ स्त्रियामाकारः पुंबहुत्वे च ॥ १२ ॥

स्त्रियां वर्तमानाभ्यां च्यह् म्यह् शब्दाभ्यां षष्ठ्यामेकत्वबहुत्वयोरन्त्यस्वरस्याकारो भवति पुंलिङ्गस्य बहुवचने ऽपि ॥ च्यांञ् । तव । स्त्रीलिङ्गवाची शब्दः ॥ च्यात्र । तव स्त्रीलिङ्गवाचिनः शब्दाः ॥ च्यां[नि न्यचि[वि । तव पुत्राः ॥ म्यां[नि न्यचि[वि । मम पुत्राः ॥ साधनं पूर्ववत् ॥

॥ प्रत्ययादेरोत्पुंसि ॥१३॥

तयोः पुंलिङ्गस्य एकवचने प्रत्ययादेरुकारस्य ओकारो भवति ॥ च्योनु । तव ॥ म्योनु । मम ॥ साधितवरावेव ॥

॥ प्रयोगलिङ्गस्यौकारोपधाया आत्वं सर्वत्र ॥१४॥

सर्वनामशब्दानां यत्र प्रयोगलिङ्गस्य उपधाभूत ओकारः स्यात्तत्र आत्वं भवति ॥ च्यानि सूंतिन् । त्वद्धेतुना ॥ म्यानि सूंतिन् । मद्धेतुना ॥ सानि सूंतिन् । अस्मद्धेतुना ॥ तुहन्दि सूंतिन् । युष्मद्धेतुना ॥ च्योनु । म्योनु । सोनु । इति प्रयोगलिङ्गेभ्यः इ सूंतिन् प्रत्ययः । उवर्णान्तानामिकार (सू०२।१।३०) इति उमात्राया इकारः । इतो लोप (सू०२।१।८) इति इ प्रत्ययस्य लोपः । अनेनोपधाया आत्वम् ॥ च्यां[नि सन्दि सूंतिन् । त्वदीयेन ॥ म्यां[नि सन्दि सूंतिन् । मदीयेन ॥ अत्र च्योनु म्योनु शब्दाभ्यां पूर्वं सन्दु प्रत्ययः । उवर्णान्तानाम् (सू०२।१।३०) इति इकारः । अनेनोपधाया आकारः । षष्ठीप्रयोगात् इ सूंतिन् प्रत्ययः । शेषं पूर्ववत् ॥ बहुत्वे तु । च्यान्यौ सूंतिन् । त्वदीयैः ॥ म्यान्यौ सूंतिन् । मदीयैः ॥ तुहन्द्यौ सूंतिन् । युष्मदीयैः ॥ सान्यौ सूंतिन् । अस्मदीयैः ॥ तृतीयाया औ सूंतिन् प्रत्यय एव भवति । तुहन्दि सन्द्यौ सूंतिन् । इति ग्राम्याः । एवं सर्वनामशब्देषु सर्वत्र बोध्यम् ॥

॥ त्वंह्यस्यौ बहुत्वे ॥१५॥

यूह् ब्वह् शब्दयोः सर्वत्र बहुत्वे त्वंहि असि आदेशौ भवतः ॥ त्वंहि । यूयम् ॥ असि । वयम् ॥ त्वह्य । युष्मान् ॥ अस्य । अस्मान् ॥ द्वितीयायां न्प्रत्यये सर्वत्र (सू० २।१।११) इत्यकारागमे कृते प्रत्ययस्य लोप (सू० ९) इत्यादिसूत्रेण नकारलोपः । यत्वम् ॥

॥ तिम् यिम् कम् इम् हुमश्चोभयेषाम् ॥१६॥

उभयेषां प्राणिवाचिनामप्राणिवाचिनां च शब्दानां सर्वत्र बहुत्वे तिम् आदय आदेशा भवन्ति ॥ तिमन् । तान् । तानि ॥ यिमन् । यान् । यानि ॥ कमन् । कान् । कानि ॥ इमन् । इमान् । इमानि ॥ हुमन् । अमून् । अमूनि ॥ तिह् आदिशब्देभ्यो । द्वितीयायां स्नाव् (सू०२।१।३८) इति न् प्रत्ययः । अनेन तिम् आदय आदेशाः । न्प्रत्यये सर्वत्र (सू०२।१।१२) इत्यकारागमः ॥ एवं तिमौं सूतिन् ॥ तिहन्दि पुछ्य् । तिमौं प्यठ । तिहन्दु । तिमन् प्यठ् । इत्यादि विज्ञेयम् ॥

॥ स्प्रत्यय इकारागमः ॥१७॥

तिह् आदिशब्दानां सकारे परे इकारागमो भवति ॥ तमिस् । तम् ॥ एवं सर्वेषाम् । अत्र लोपविधेर्बलीयस्त्वात् अप्राणिविषये सकारस्य लोपे कृते प्रोक्त आगमो न भवतीति ॥

॥ त्वंहेर्हन्दौ हिलोपः पुंस्त्रियोर्वस्योत्वं च ॥१८॥

यूह् शब्दबहुत्वनियतस्य त्वंहेः पुंलिङ्गे स्त्रीलिङ्गे च हन्दौ परे हिलोपो भवति वकारस्य च उत्वं भवति । पुंलिङ्गकथनात् हकारस्य सकारनिषेधः ॥

तुहंन्दु । युष्माकं पुं ॥ तुहंन्जू । युष्माकं स्त्री ॥ स्हंन्दु स्हंन्जू प्रत्ययौ । एकत्र सश्च (सू० १०) इति । अपरत्र स्लोपः स्त्रियां सर्वत्र (सू०२।१।४०) इति स् लोपः । अनेन हिलोपः वकारस्य उत्वं च ॥

॥ असेराद्यन्तस्वरयोर्लोपाकारावुनुञोः ॥१९॥

ब्वह् शब्दस्य बहुत्वे नियतस्य अंसिपदस्य उनु ञ् इत्येतयोः परयोरादिस्वरस्य लोपः अन्त्यस्वरस्य चाकारो भवति ॥ सोनु । अस्माकम् । एकवचनम् ॥ सांनि । अस्माकम् । बहुवचनम् ॥ ब्वह् शब्दात् उनु नि प्रत्ययौ । त्वंह्यस्यौ बहुत्वे (सू० १९) इति अंसि आदेशः । अनेनाकारस्य लोपः । इकारस्य च अकारः । एकत्र प्रत्ययादेरोत्पुंसि (सू० १३) उकारस्य ओकारः । षष्ठ्यामन्त्यस्वरस्य (सू० ११) इत्यादिना अकारलोपः । अपरत्र स्त्रियामाकारः पुंबहुत्वे च (सू०१२) इति आकारः । स च इदन्तत्वादप्रसिद्धः (सू०२।१।७०) ॥ एवं । सांञ् । अस्माकम् । एकवचनं स्त्रीलिङ्गवाचकम् ॥ साञ । अस्माकम् । बहुवचनं स्त्रीलिङ्गवाचकम् ॥ साधनं पूर्ववत् ॥

॥ प्राणिनि मिलोपो वा सकारे ॥ २० ॥

प्राणिवाचिनां तदादिशब्दानां सकारे परे मिकारस्य विकल्पेन लोपो भवति ॥ तस् । तम् वा तस्य ॥ तमिस् । तम् वा तस्य ॥ तसंन्दु । तस्य ॥ तंमि संन्दु । तस्य ॥ सुह् शब्दात्स्प्रत्ययः । उभयेषाम् (सू०९) इति तम् आदेशः । स्प्रत्यये इकारागमः (सू०१७) । अनेन एकत्र मिलोपः ॥ एवं । यस् । यम् वा यस्य ॥ यमिस् । यम् वा यस्य ॥ यसंन्दु । यस्य ॥ यंमि संन्दु । यस्य ॥ कस् । कम् वा कस्य ॥ कमिस् । कम् वा कस्य ॥ कसंन्दु । कस्य ॥ कंमि संन्दु । कस्य ॥

इम् हुम् शब्दयोः संबन्धषष्ठ्यामेव । इमंन्दु । अस्य ॥ इमिसंन्दु अस्य ॥ हुमंन्दु । अमुष्य ॥ हुमि संन्दु । अमुष्य ॥ अमंन्दु । अस्य ॥ अमि संन्दु । अस्य ॥

बहुत्वे तु सर्वेषां मन् इत्यस्य विकल्पेन लोप इष्यते ॥ तिहंन्दु वा तिमन् हंन्दु । तेषाम् ॥ यिहंन्दु वा यिमन् हंन्दु । येषाम् ॥ कहंन्दु वा कमन् हंन्दु केषाम् ॥ इहंन्दु वा इमन् हंन्दु । एषाम् ॥ हुहंन्दु वा हुमन् हंन्दु । अमीषाम् ॥

संबन्धषष्ठ्यां किम् । इमिस् । इमं वा अस्य ॥ हुमिस् । अमुं वा अमुष्य ॥ अत्र विकल्पाभावः ॥ प्राणिनि किम् । तम्युक् । तस्य वस्तुनः ॥

॥ निश्चयार्थे धातुलिङ्गस्वरूपान्ते यः प्रत्यय-योर्मध्ये वा ॥ २१ ॥

धातुस्वरूपस्य वर्तमानादिषु लिङ्गस्वरूपस्य च प्रथमादिषु तद्धितादिषु च निश्चयार्थे गम्यमाने अन्ते यः प्रत्ययो भवति । द्वयोः प्रत्यययोर्मध्ये वा भवति ॥ तसंन्दुय् । तस्यैव ॥ तमि संन्दुय् । तस्यैव ॥ ग्वरस्नूय् अन्दर् । गुरावेव ॥ ग्वर-नूय् अन्दर् । गुरुष्वेव ॥ एवं सर्वेषां लिङ्गानां सर्वासु विभक्तिषु बोध्यम् ॥ प्रत्यययोर्मध्ये यथा ॥ ग्वरनूय् हन्दि पुछ्य् । गुरुभ्य एव ॥ ग्वर सन्दिय् पुछ्य् । गुरवे एव ॥ अत्र एकवचने स् प्रत्ययस्य लोपे कृते संन्दु पुछ्य् इत्येतयोर्मध्ये य् प्रत्ययः ॥ ग्वरन् हन्दिय् पुछ्य् । वा ग्वरन् हन्दि पुछिय् । इत्यपि साधु ॥ तद्धितप्रत्ययेभ्यो यथा । गाटुलुय् । दक्ष एव ॥ धातुस्व-रूपेभ्यो यथा । करानूय् छुह् । करोत्येव ॥ कर्योनूय् । अकृतैव तेन ॥ करिय् करिष्यत्येव ॥ उपमायामपि क्वचिद्व्यवह्रियते । यथा चाट् ति गौब् न्यचिवुय् । शिष्यो ऽपि पुत्र एवास्ति ॥

॥ सोरुशब्दस्वरूपेभ्यो नित्यमेव ॥ २२ ॥

सोरु शब्दस्य यानि स्वरूपाणि तेभ्यः प्रायशो नित्यमेव य् प्रत्ययो भवति ॥ सोरु । सर्वः ॥ सोरुय् । सर्व एव ॥ सोरि । सर्वे ॥ सोरिय् । सर्वे एव ॥

॥ यप्रत्यये औकारस्याव् ॥ २३ ॥

प्रत्ययसंबन्धिन औकारस्य य् प्रत्यये परे अव् भवति ॥ गुर्यव्य् सूतिन् । घोटकैरेव ॥ नमव्य् सूतिन् । नखैरेव ॥ गुर्यौ सूतिन् । नमौ सूतिन् इत्यनयोर्मध्ये य् प्रत्यये कृते अनेन औकारस्य अव् । व्यञ्जनं परेण संधेयम् (सू० १।३) ॥

॥ व्याख् शब्दस्य बिय् प्रथमाबहुत्वादिषु ॥ २४॥

स्पष्टम् ॥ बिय् । अपरे ॥ बियन् । अपरान् ॥ बियौ । अपरैः ॥ अनेन बिय् आदेशे कृते व्यञ्जनान्तलिङ्गवत्साधनम् ॥

॥ कूतुशब्दस्योपधायाः प्रथमाबहुत्वे द्वितीयाद्येकवचनादिषु चाप्रसिद्धता ॥ २५ ॥

स्पष्टम् ॥ कूति । कियन्तः ॥ कूतिम् । कियन्तम् ॥ कूति । कियता ॥

॥ बहुत्वे वैत्वम् ॥२६॥

कूतु शब्दस्य द्वितीयादिबहुत्वे वा ऐत्वं भवति विकल्पेनाप्रसिद्धता च ॥ कूत्यन् । कियतः ॥ कैत्यन् । कियतः ॥ कूत्यौ सूतिन् । कियद्भिर्हेतुभिः ॥ कैत्यौ सूतिन् । कियद्भिर्हेतुभिः ॥ एवं सर्वत्र विज्ञेयम् ॥

॥ य्यूतुत्यूतुयूतुशब्दानामीत्वमप्रथमैक-वचने ॥२७॥

प्रथमैकवचनं वर्जयित्वा एषां शब्दानां यूकारस्य ईत्वं भवति ॥ यीति । यावन्तः ॥ तीति । तावन्तः । ईति । इयन्तः ॥ एवं सर्वत्र ज्ञेयम् ॥

॥ मूँष ऐत्वम् ॥२८॥

मूँष् शब्दोपधायाः प्रथमाबहुत्वादिषु ऐत्वं भवति ॥ मैँष । महिष्यः ॥ मैँषन् । महिषीः ॥ मैँषौ सूँतिन् । महिषीभिः ॥

॥ कूँहो ऽन्त्यस्य सश्च ॥२९॥

कूँह् शब्दस्य उपधाया ऐत्वं भवति अन्त्याक्षरस्य च सकारो भवति ॥ कैँसि दप् । कंचिद्वद ॥ कैँसि दंप् । केनचिदुक्तम् ॥ कैँसि हन्दु । कस्यचित् ॥ इत्यादि । साधनं पूर्ववत् ॥ कूँह्शब्दापरपर्यायस्य काँह् शब्दस्य चेत्थं बोध्यम् । किंचानयोः शब्दयोरुभयलिङ्गत्वात् द्वितीयायां स् प्रत्ययः । स्त्रियामिकार (सू० २।१।३७) इति इकारागमः । स्लोपः स्त्रियां सर्वत्र (सू० २।१।४०) इति स् लोपः ॥

॥ केन्च् शब्दो नित्यं बहुत्वे ॥३०॥

स्पष्टम् ॥ केन्च् । केचित् ॥ केन्चन् । कांश्चित् ॥ केन्चौ । कैश्चित् ॥

॥ काँछाह् कैँछाह् शब्दावेकत्वे ॥३१ ॥

स्पष्टम् ॥ काँछाह् । कश्चित् ॥ कैँछाह् । किंचित् ॥

॥ ज़्हद् शब्दस्य दु द्वितीयादिषु ॥३२॥

द्विवाचकस्य ज़्हद् शब्दस्य द्वितीयादिविभक्तिषु दु आदेशः स्यात् ॥ द्वन् । द्वौ ॥ द्वयौ सूतिन् । द्वाभ्याम् ॥

॥ अयागमः स्वरे ॥३३॥

तस्मादादेशकृतात् दुशब्दात्स्वरे परे अयागमो भवति ॥ द्वयि सूतिन् । द्वयेन ॥ द्वयौ सूतिन् । द्वाभ्याम् ॥ ज़्हद् शब्दात् औ सूतिन् प्रत्ययः । पूर्वसूत्रेण दु आदेशः । अनेन अय् आगमः । व्यञ्जनं परेण संधेयम् (सू० १।३) ॥

॥ त्रिह्षद्दोरन्त्यलोपश्च ॥३४॥

त्रिह् षद् शब्दाभ्यां स्वरे परे अयागमो भवति । अन्त्याक्षरस्य च लोपो भवति ॥ त्रयौ सूतिन् । त्रिभिः ॥ षयौ सूतिन् । षड्भिः ॥

॥ वा चोर्शब्दस्य न्प्रत्यये ह्रस्वश्च ॥३५॥

च़ोर् शब्दस्य न्प्रत्यये परे विकल्पेनान्त्याक्षरस्य लोपः ओकारस्य च उकारो भवति ॥ च़्वन् । चतुरः । वा । च़ोरन् । चतुरः ॥ च़ोर् शब्दात् द्वितीयायां न् प्रत्ययः अनेन रकारलोपः ओकारस्य च उकारः । उकारो वः (सू० १।११) इति वत्वम् । व्यञ्जनं परेण संधेयम् (सू० १।३) । अन्यत्र न्प्रत्यये (सू० २।१।१२) अकारागमः ॥

॥ पानशब्दादिप्रत्ययलोपः ॥३६॥

अयं शब्दो नित्यमेकवचन एव । देहार्थवाचकस्य पान् शब्दस्य तु एकानेकत्वं भवति ॥ पान । स्वयम् ॥ पानस् । स्वम् ॥ पान । स्वेन ॥

॥ अकारलोपोपधाह्रस्वौ चोनुञोः ॥३७॥

तस्यैव पानशब्दस्य उनु ञ् इत्येतयोः प्रत्यययोः परयोरकारस्य लोप उपधायाश्च ह्रस्वो भवति ॥ पनुनु। स्वस्य पुंलिङ्गे ॥ पनंञ्। स्वस्य स्त्रीलिङ्गे ॥ साधनं पूर्ववत् ॥ देहार्थवाचकस्य पान् शब्दस्य। पानुकु। देहस्य पुंलिङ्गे ॥ पानंचू। देहस्य स्त्रीलिङ्गे ॥ इत्यादिस्वरूपाणि भवन्ति ॥

॥ अख्जोरयोराहागमो निश्चयसामान्ये ॥३८॥

अख्शब्दात् द्विवाचकाज्जोरशब्दाच्च निश्चयसामान्ये गम्यमाने आह् आगमो भवति ॥ अखाह्। एककः ॥ जोराह्। द्विकम् ॥ अख्शब्दस्य प्रथमायामेव विज्ञेयम्। अपरस्य सर्वासु विभक्तिषु। अख्शब्दग्रहणात्प्रथमैकवचनान्तेभ्यः सर्वेभ्यः शब्देभ्यो भवति ॥ कथाह्। एक आलापः ॥ जोराहौ सूतिन्। द्विकेन ॥

॥ त्रिहस्तारादेशः ॥ ३९ ॥

निश्चयसामान्ये त्रिह्शब्दस्य तार आदेशो भवति ॥ तार। त्रिकम् ॥ निश्चयसामान्ये किम्। त्रिय्। त्रय एव ॥

॥ चोरश्चवमरः ॥ ४० ॥

चोर् शब्दस्य च़वमर आदेशो भवति निश्चयसामान्ये ॥ च़वमर। चतुष्कम् ॥ निश्चयसामान्ये किम्। च़ोरय्। चत्वार एव ॥

॥ पान्च्ः पैंशः ॥ ४१ ॥

पान्च्शब्दस्य पैंश आदेशो भवति निश्चयसामान्ये ॥ पैंश । पञ्चकम् ॥ निश्चयसामान्ये किम् । पान्च्य् । पञ्चैव ॥

॥ षहो ऽन्त्यस्य खाह् ॥ ४२ ॥

षह्शब्दस्यान्त्याक्षरस्य खाह् आदेशो भवति निश्चयसामान्ये ॥ षखाह् । षट्कम् ॥ निश्चयसामान्ये किम् । षय् । षडेव ॥

॥ सतष्ट एठागमश्च ॥ ४३ ॥

सत्शब्दस्यान्त्याक्षरस्य टकारो भवति एठ आगमश्च निश्चयसामान्ये ॥ सटेठ । सप्तकम् ॥ निश्चयसामान्ये किम् । सतय् सप्तैव ॥

॥ ऐठादिभ्यो ऽमरागमश्च ॥ ४४ ॥

ऐठ्आदिभ्यः संख्याभ्यो निश्चयसामान्ये अमर आगमो भवति ॥ ऐठमर । अष्टकम् ॥ नवमर । नवकम् ॥ दहमर । दशकम् ॥ निश्चयसामान्ये किम् ॥ ऐठय् । अष्टावेव ॥ नवय् । नवैव ॥

॥ एकत्वनिर्दिष्टपरिमाणादिशब्दात्खण्डा च ॥४५॥

एकवचनेन निर्दिष्टो यः संख्यापरिमाणादिशब्दस्तस्मान्निश्चयसामान्ये खण्डा प्रत्ययो भवति । चशब्दात् आह् आगमो ऽपि भवति ॥ अखाह् खण्डा । एकमात्रम् ॥ च्ाखाह् खण्डा । चतुष्टयमात्रम् ॥ दहाह् खण्डा । दशकमात्रम् ॥ हथाह् खण्डा । शतमात्रम् ॥ क्रुहाह् खण्डा । क्रोशमात्रम् ॥ द्रहाह् खण्डा ।

दिनमात्रम् ॥ ऋंथाह् खण्डा । ऋतुमात्रम् ॥ रुपयाह् खण्डा । मुद्रिकामात्रम् ॥ एकत्वनिर्दिष्टात्किम् ॥ तार । त्रयः ॥ च़्वमर । चत्वारः ॥ च़ोराह् खण्डा । इति तु न भवति ॥ च़ार्‌ख्‌शब्दस्य त्वेकत्वनिर्देशाद्भवत्येव । परं तु यत्रैव आह् आगमो भवति तत्रैव खण्डा प्रत्ययः सस्वरः स्यात् । यत्र तु केवलः स्यात्तत्र खण्ड् प्रत्ययो भवति । यथा । क्रुह् खण्ड् । क्रोशमात्रम् ॥

॥ सर्वेभ्यो बहुवचनान्तेभ्यो ज़ू ॥ ४६ ॥

बहुवचनान्तेभ्यः सर्वेभ्यः शब्देभ्यो निश्चयसामान्ये ज़ू प्रत्ययो भवति । कटंज़ू । मेषाः ॥ गुरिज़ू । अश्वाः ॥ रुपयंज़ू । रूपिकाः ॥ कञ्ज़ू । शिलाः इत्यादि ।

इति शारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
लिङ्गप्रकरणे सर्वनामपादस्तृतीयः ॥ ३ ॥
समाप्तं चेदं लिङ्गप्रकरणम् ॥२॥

अथ समासप्रक्रिया ॥२॥

शब्दाः संज्ञाविभक्त्यव्ययधातुभेदाच्चतुर्धा भवन्ति ॥ तत्र विभक्तिः केवलं स्वयमर्थदानाभावात्संज्ञया संगत्य कारकार्थं जनयति । धातुना च संगत्यातीतादिकालबोधिनी क्रिया भवतीति ॥ अव्यया हि स्वार्थदाने विभक्तिनिरपेक्षा इति ॥ विभक्तियोगात्संपन्नयोः क्रिययोर्वक्ष्यमाणसमासरीतिवत्संयोगो ऽसंभाव्यो ऽस्ति किंत्वव्ययभूतैः कृत्प्रत्ययैरेवेति ॥ संज्ञा तु विशेष्यपदविशेषणपदभेदाद्विविधा । तत्र द्वयोर्विशेष्यपदविशेषणपदयोः परस्परसंयोगो युक्तः विशेष्याद्विशेषणस्य बहिरनवस्थानादिति । विशेष्ययोस्तु पदयोः संयोगः कदाचित्संभाव्यः स्यात् । संयोगसंभवे तु पदे विशेष्ये वा भवतां । विशेष्यविशेषणे वा भवतामिति तुल्यमस्ति । कदाचित्त्वसंभाव्यः । इति द्वे स्वरूपे । तयोस्तु तुल्यातुल्यविभक्तिसंयोजनया चत्वारि स्वरूपाणि भवन्तीत्यतः समासाश्चत्वार एव भवितुमर्हन्त्येतदर्थं युक्तायुक्तेति समासलक्षणं सूत्रयति ॥

॥ युक्तायुक्तपदविभक्तीनां संगतिकृत्समासः ॥१॥

युक्तानां योग्यानामयुक्तानामयोग्यानां पदानां विभक्तीनां च संगतिकृत्संयोगकारकः समासो ऽवगन्तव्यः ॥ तत्रायुक्तपदसमविभक्तीनां संधायको द्वन्द्वः ॥ युक्तपदसमविभक्तीनां योगकारी कर्मधारयः ॥ युक्तपदभिन्नविभक्तीनां संधायकस्तत्पुरुषः ॥ अयुक्तपदायुक्तविभक्तीनां संयोगकारको बहुव्रीहिरिति ॥ संबन्धसंज्ञायां समासे विशेषः । तत्र संबन्धसंज्ञा द्विविधा ॥ एका

सामान्यसंबन्धसंज्ञा । द्वितीया विशेषसंबन्धसंज्ञा ॥ तत्र तदादिशब्दाः सामान्यसंबन्धसंज्ञकाः ॥ यथैकस्मिन्नेव मनुष्ये स्वयं वक्तरि सति अहमिति संज्ञा कथ्यते ॥ तस्मिन्नेव श्रोतृतया संनिधिस्थेन येन केनचित्प्रोक्ते त्वमिति संज्ञा ॥ अश्रोतृतया संनिधिस्थेन प्रोक्ते अयमिति संज्ञा ॥ असंनिधिस्थेन येन केनचित्प्रोक्ते स इति संज्ञा ॥ द्वापरतया क इति संज्ञा ॥ सामान्यतया य इति संज्ञा। इति सामान्यसंबन्धसंज्ञा। अत्र संबन्धषष्ठीतत्पुरुषं विना समासाद्याप्तिर्नावधार्येति ॥ विशेषसंबन्धसंज्ञापि सामान्यविशेषाभ्यां द्विविधा ॥ तत्राद्या शिल्पवशात्सूपादिसंज्ञा तस्मिन्सूपत्वशिल्पस्य समवायिसंबन्धाद्धि तदादिशब्दवदेकेन सूप इत्युच्यते अपरेण स्वर्णकार इत्युच्यत इति विशेषत्वम्। परं तु सर्वैः सूप इत्युच्यत इति सामान्यत्वमिति ॥ अपरा पितृपुत्रादिवत्संबन्धसंज्ञा ॥ यथा हे पितरिति पुत्रेणैव कथ्यते बैजिकसंबन्धात् नान्येन॥ स एव सहोदरेण भ्रातेति कथ्यते समानोदर्यत्वात्॥ इत्यादयो विशेषसंबन्धसंज्ञकाः ॥ अत्र समासावाप्तिर्धीमद्भिरवधार्या इति ॥

द्वन्द्वोदाहरणं यथा॥ ताफ् गट । आतपान्धकारौ॥ अत्रातपेन साकं न को ऽपि ध्वान्तस्य संबन्धः किंतु समविभक्तित्वात् द्वन्द्वेन संबन्धः संपन्नः ॥

कर्मधारयोदाहरणं यथा ॥ म्वटि गुरि सूतिन् गौव्। स्थूलघोटकेन गतः ॥ अत्र य एव स्थूलः स एव घोटक इति युक्तपदत्वम्। स्थूलेन घोटकेन गत इति समविभक्तित्वामित्यतः कर्मधारयेण संगतिः ॥

तत्पुरुषोदाहरणं यथा॥ राज़् न्यच्युव्। राजपुत्रः॥ अत्र राज्ञा सह पुत्रस्य योग्यत्वे ऽपि राज्ञः पुत्र इत्यनयोर्भिन्नविभक्तित्वमित्यतस्तत्पुरुषेण संगतिः ॥

बहुव्रीह्युदाहरणं यथा॥ हूनि बुथ्। श्वमुखः॥ अत्र श्वन्शब्दमुखशब्दयोर्न च योग्यत्वसंबन्धः नापि श्ववन्मुखं यस्य स श्वमुख इति निरुक्त्या विभक्तिसंबन्ध इत्यतो बहुव्रीहिना संगतिः ॥

॥ समासमध्ये विभक्तिलोपो व्यञ्जनाद्यवयवस्य ॥ २ ॥

समासे कर्तव्ये पदयोर्मध्ये या विभक्तिस्तस्या व्यञ्जनाद्यवयवस्य लोपो भवति। "एको ह्यवयवो यस्य को ऽसाववयवी भवेत्" इति कथनान्न केवलव्यञ्जनरूपप्रत्ययस्य लोपः स्यात्॥ छत्यौ गुर्यौ सूतिन् आव्। श्वेतघोटकैरागतः॥ नीलिस् गुरिस्। अत्र स् प्रत्ययस्य केवलत्वान्न लोपः। छंतु शब्दाद्गुरु शब्दाच्च औ सूतिन्प्रत्ययः अनेन मध्याविभक्तेः सूतिन् इति विभक्त्यवयवस्य लोपः। प्रत्ययलोपे प्रत्ययलक्षणम् (पा० सू० १।१।६२) इति उवर्णान्तानामिकारः (२।१।३०) इति यत्वम्॥

॥ सजातीयविभक्तिकानां विजातीयपदानामन्त्यपदविभक्त्या कथनं द्वन्द्वः ॥३॥

येषां वस्तूनां लोकेषु संयोगो ऽसंभाव्यो ऽपि स्यात्तेष्वपि शब्देषु तुल्यविभक्तिकेषु सत्सु स्वकल्पितस्यान्त्यपदस्य विभक्त्या तेषां कथनं द्वन्द्वसमासो विज्ञेयः॥ नब् नम् फल्। नभोनखफलम्॥ एषां पदानां यद्यपि संयोगो ऽसंभाव्यो ऽस्ति तथाप्यनेन संगतिः॥ वारि कुलि फल ज़ल पुछ्य् आव्। वाटिकावृक्षफलजलायागतः॥ वारूशब्दात् कुलुशब्दात् फल्शब्दात् ज़ल्शब्दाच्च इ पुछ्य् प्रत्ययः। समासमध्ये (सू० २) इति सूत्रेण मध्यमानां पुछ्य् इति प्रत्ययावयवानां लोपः। प्रथमयोरुवर्णान्तानामिकार (सू० २।१।३०) इति ऊकारोकारयोरिकारः। इतो लोप (सू० २।१।६) इति इप्रत्ययस्य लोपः। अपरयोर्व्यञ्जनान्तत्वादिकारस्याकारः (२।१।४)॥ माज्य कोर्य। मातापुत्रिके॥ मालि पुथ्र्। पितापुत्रौ॥ हश न्वप। श्वश्रूस्नुषे॥ ज़ाम् कारुञ। ननन्दाप्रजावत्यौ॥ पच्य कूच्य। पट्टिकादारुणी॥

॥ विशेषणविशेष्ययोः पूर्वोत्तरपदस्थयोरेकपदे-नाभिधानं कर्मधारयः ॥४॥

विशेष्यविशेषणयोर्योग्यसंबन्धत्वाद्युक्तपदत्वं विशेष्याद्बहिर्विशेषणस्यानवस्थानात् तयोः समविभक्तित्वमपि नित्यमेव स्यात्तयोर्विशेषणे पूर्वपदस्थे विशेष्ये उत्तरपदस्थे सति एकविभक्त्या यत् कथनं स कर्मधारयसमासो विज्ञेयः ॥ बड्यन् द्यारन् छुह् ज़ेनान् । महद्द्रव्याण्यर्जयति ॥ स्वचि च्वचि सूतिन् । स्थूलपूपेन ॥ त्रिछि कोरि पुछ्य् । दक्षकन्यायै ॥ बजि लरि प्यठ । महद्गृहात् ॥ बज्य ग्रेन्ज़् हेन्द्। महत्संख्यायाः ॥ बडिस् गुरिस् प्यठ् । महदश्वोपरि। अत्र प्रथमान्त्ययोः न् स् प्रत्यययोः केवलत्वान्मध्ये ऽपि न लोपः । किंतु न् प्रत्यये सर्वत्र (सू० २।१।१२) इति अकारागमः । उवर्णान्तानामिकार (सू० २।१।३०) इति सर्वत्र इकारः । ऊदन्तटवर्ग (सू०२।१।२२) इत्यादिसूत्रेण क्रमेण टवर्गान्तस्य चवर्गः । शेषं पूर्ववत् ॥

॥ अप्रथमान्ते पूर्वपदे विभिन्नविभक्तिकयोः पदयोर्युगपत्कथनं तत्पुरुषः ॥५॥

संभाव्यसंयोगसत्ताकयोः पदयोर्मध्यात्प्रथमाविभक्तिव्यतिरिक्ते पूर्वपदस्थे सति तुल्यातुल्यप्रथमादिविभक्तिके उत्तरपदस्थे तयोर्यद्युगपत्कथनं स तत्पुरुषसमासो बोध्यः ॥ श्राकि खश् । छुरिकाच्छेदः ॥ टोपि फलु । शिरस्त्रप्रान्तम् ॥ सर्प बय सूतिन् । सर्पभयेन ॥ राज़ न्यचिवि पुछ्य् । राजपुत्राय ॥ बट कोर्य हेन्द्। ब्राह्मणकन्यायाः ॥ स्वन डब अन् । स्वर्णपुटकमानय ॥ म्यचि फ्तु थव् । मृत्कटोलं निधेहि ॥

॥ उत्तरपदस्थस्य पोशुशब्दस्य पो वः ॥६॥

समासविषये पोशुशब्द उत्तरपदस्थे सति पोशु शब्दसंबन्धिनः पकारस्य

वकारः स्यात् ॥ गंग वोश्नु । गङ्गाजलम् ॥ व्यथ वोश्नु । वितस्ताजलम् ॥ शीन वो-श्नु । हिमजलम् ॥ वुग वोश्नु । ओघजलम् ॥ मार् वोश्नु । मारीजलम् ॥ क्रीरि वो-श्नु । कूपपानीयम् ॥ रूद वोश्नु । वर्षापानीयम् ॥ नाग वोश्नु । अखातजलम् ॥ समासे किम् । व्यथि हन्दि पाञ्जि सूतिन् । वितस्तायाः पानीयेन ॥

॥ पूर्वपदस्थे ञस्यानुस्वारः ॥७॥

समासविषये पोञ्नुशब्दे पूर्वपदस्थे सति ञकारस्यानुस्वारो भवति ॥ पाँ त्रख् । पानीयद्रोणः ॥ पाँ नंटु । पानीयकुम्भः ॥ समासे किम् । पाञ्नुकु त्रख् । पानीयस्य द्रोणः ॥

॥ दाञ्शब्दस्यापि ॥८॥

समासविषये दाञ्शब्दे पूर्वपदस्थे सति ञकारस्यानुस्वारो भवति ॥ दाँ खार् । धान्यखारी ॥ दाँ फूतु । धान्यकटोलः ॥ अपिशब्दादन्येभ्यो ऽपि ॥ वाँ घंलु । वणिक्तृणं ॥ वाँ कूरू । वणिक्कन्या ॥ समासे किम् । दाञ्चू खार् ॥

॥ पंथ्र्शब्दस्य पुंलिङ्गे च ॥९॥

पंथ्र्शब्दः स्वयं पुंलिङ्गः समासे ऽपि पुंलिङ्गेन निर्देशे कर्तव्ये पकारस्य वकारो भवति ॥ बोञ्जि वंथ्र् [। छायावृक्षपत्रम्] ॥ पोष वंथ्र् [। पुष्पपत्रम्) ॥ ख्यलु वंथ्र् । पञ्चतृणपत्रम् ॥ हाक वंथ्र् । शाकपत्रम् ॥ पुंलिङ्गेन किम् । मुजि पंत्र् । मूलिकापत्रम् ॥ गुग्जि पंत्र् । इत्यादि ॥

॥ पंचाहः समासे ॥१०॥

समासविषये पंञ्चाह्शब्दस्य पकारस्य वकारो भवति ॥ अकवन्ज़ाह ॥ द्ववन्ज़ाह् । कुनवन्ज़ाह् । इत्यादि ॥

॥ शैठः शस्य हः ॥११॥

कुनहैठ्। अकहैठ्। ढ्रहैठ्। इत्यादि ॥

॥ च़्वंटूशब्दस्य स्वंटू आदेशः सस्यव्यतिरिक्ते ॥१२॥

सस्यव्यतिरिक्तस्य वस्तुनः अपूपार्थके च़्वंटूशब्दे उत्तरपदस्थे स्वंटू आदेशो भवति ॥ ठूल-स्वंटू। अण्डापूपः ॥ नदूरि-स्वंटू। बिसापूपः ॥ चामंस्-स्वंटू। आमिक्षापूपः ॥ अद्रक-स्वंटू। आद्रकापूपः ॥ सस्यव्यतिरिक्ते किम् ॥ तमुल च़्वंटू। तण्डुलापूपः ॥ कनक-च़्वंटू। गोधूमापूपः ॥ वुषिक-च़्वंटू। यवापूपः ॥ सस्ये ऽपि पुंलिङ्गनिर्देशेन स्वंटू आदेश इष्यते ॥ तमुल-स्वंटू। अब-स्वंटू। इत्यादि ॥

॥ पूर्वोत्तरपदस्थभेद्यभेदकोभयविशिष्टान्यपदबोधको बहुव्रीहिः ॥१३॥

विशेष्ये पूर्वपदस्थे विशेषणे चोत्तरपदस्थे सति तदुभयेन विशिष्टस्यान्यपदस्य ज्ञानविधायको बहुव्रीहिर्ज्ञेयः ॥ यड-बंडु। बृहदुदरः ॥ दारि-ज़्यूठु। दीर्घश्मश्रुः ॥ कन-च़्वटु। छिन्नकर्णः ॥ दु-वहरु। द्विवार्षिकः ॥ दु-वरिश्। द्विवार्षिकी ॥ सत-बाचु। सप्तकुटुम्बः ॥ पाँच़-प्वतुर्। पञ्चपुत्रः ॥ हूनि-बुथु। श्वमुखः ॥ अत्र मध्यपदलोपो बुद्धिमतावधार्यः ॥

॥ द्विरुक्तेन च ॥१४॥

एकेनैव पदेन द्विरुक्तेन विशिष्टस्यान्यपदस्यावबोधकश्च बहुव्रीहिर्विज्ञेयः ॥ स च स्त्रीलिङ्गः ॥ ठुल ठुल। शृङ्गाशृङ्गि ॥ टप टफ्। खुराखुरि ॥ ठूँक ठूँख्। शृङ्गाशृङ्गि ॥ चप चफ्। दन्तादन्ति ॥

इति श्रीशारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते समासप्रक्रिया समाप्ता ॥३॥

अथ तद्धितप्रक्रिया ॥४॥

॥ जातेरपत्यार्थे पूतु ॥१॥

अपत्ये ऽभिधेये सति जातेर्जातिवाचकाच्छब्दात् पूतु प्रत्ययो भवति ॥ दर-पूतु । कौल-पूतु । तिक्कि-पूतु । इत्यादि ॥ दर् कौल् त्युकु इति जातिवाचकाः शब्दाः । अनेन सूत्रेण पूतु प्रत्ययः । व्यञ्जनान्तानामकारागमः (सू०२।१।३६) । तृतीये युकारोपधाया इत्वम् (सू०२।१।७६) । उवर्णान्तानामिकारः (सू० २।१।३०) एवमुत्तरत्र ज्ञेयम् ॥ जातिशब्दग्रहणात्पशुपक्ष्यादीनां जातिर्गृह्यते ॥ काव-पूतु । काकपोतः ॥ पछिन्-पूतु । पक्षिपोतः ॥ कुकर्[1]-पूतु । कुक्कुटपोतः ॥ कट-पूतु । मेषपोतः ॥ ग्याँ-पूतु । मेषपोतः ॥ कोतर्-पूतु । कपोतपोतः ॥ इत्यादि ॥

॥ न संज्ञायाः ॥२॥

पित्रादिनाम्नः परः पूतु प्रत्ययो न भवतीति परिभाष्यते ॥

॥ चूरशब्दाद्बालक्रीडायां च ॥३॥

पित्रादौ स्तनन्धयं क्रीडयति सति चूरशब्दात् पूतु प्रत्ययो भवति । चशब्दाच्चौरपुत्रे ऽभिधेये ऽपि ॥ चूर-पूतु । चौरपोतः ॥

[१ कुकर् कोतर् इत्यादीनि पदानि उकारान्तशब्दव्युत्पन्नान्यपि कछलादि (सू० २ । १ । ७४) गणान्तर्गतत्वात्साधूनि विज्ञेयानि ॥]

॥ मिज़्शब्दात्स्वार्थे ॥४॥

चुम्बनवाचकात् मिज़्शब्दात्स्वार्थ एव पूतु प्रत्ययो भवति ॥ मिज़-पूतु । चुम्बनम् ॥ मिज़् इत्यस्य म्वज़् च कथ्यते ॥ तेन । म्वज़-पूतु । चुम्बनम् ॥ इत्यपि भवति ॥

॥ अनादरापत्यार्थे ऽधमशब्देभ्यः कठ् ॥५॥

अनादरेण क्रोधेन च अपत्ये अभिधेये सति अधमशब्देभ्यः परः कठ् प्रत्ययो भवति ॥ चूर-कठ् । चौरपुत्रः ॥ गान-कठ् । विटपुत्रः ॥ पोग-कठ् । नाशपुत्रः ॥ वाज़-कठ् । सूदपुत्रः ॥ रास-कठ् । जारजः ॥ कु-कठ् । कुपुत्रः ॥ सुशब्दादपि दृश्यते ॥ स्व-कठ् । सुपुत्रः ॥ स्वख-कठ् । सुखपुत्रः ॥

॥ स्वस्वकार्योद्यमेनाभिधेये कॅटु ॥६॥

जातिवाचकानां शिल्पवाचकानां च शब्दानां निजनिजकार्यस्योद्यमेनापत्ये अभिधेये सति कॅटु प्रत्ययो भवति ॥ बट-कॅटु । ब्राह्मणपुत्रः ॥ दर-कॅटु । कौल-कॅटु । स्वनर्-कॅटु । स्वर्णकारपुत्रः ॥ मनर्-कॅटु । शाङ्खिकपुत्रः ॥ छान-कॅटु । तक्षकपुत्रः ॥

॥ मूँष्शब्दाच्च ॥७॥

महिषीवाचकस्य मूँष्शब्दस्यापत्ये अभिधेये कॅटु प्रत्ययो भवति ॥ मैँप कॅटु । महिषः ॥ मूँष्शब्दात् कॅटु प्रत्ययः । व्यञ्जनान्तानामकारागमः (सू० २।१।३६) । मूँष ऐत्वम् (सू० २।३।२८) इति सूत्रेण ऊकारस्य ऐत्वम् ॥

॥ पित्रोः सहजापत्यीयसंबन्धे पुंसि तुरु ॥८॥

पित्रोर्जनयितुर्जनन्याश्च सहजौ पितृभ्राता पितृभगिनी मातृभ्राता मातृभगिनी च तयोः पुमपत्यसंबन्धिनि संबन्धे अभिधेये सति तत्तच्छब्दात् तुरु प्रत्ययो भवति॥ प्वफतुरु बोयु। पैतृष्वस्रीयः॥ मासतुरु बोयु। मातृष्वस्रीयः॥ मामतुरु बोयु। मातुलपुत्रः॥

॥ स्त्रियां तूर् ॥९॥

तेषामेव शब्दानां स्त्र्यपत्यसंबन्धिनि संबन्धे अभिधेये सति तूर् प्रत्ययः स्यात्॥ प्वफतूर् ब्यञ। पैतृष्वस्रीया॥ मासतूर् ब्यञ। मातृष्वस्रीया॥ मामतूर् ब्यञ। मातुलपुत्रिका॥

॥ पितुर्शब्दात्तुर्लोपः ॥१०॥

स्पष्टम्॥ पितुरु बोयु। पैतृव्यः॥ पितूर् ब्यञ। पितृव्यपुत्री॥ एवं प्वफतूर् बा॒यि काकञ्। पैतृष्वस्रीयभार्या॥ मासतूर् बा॒यि काकञ्। मातृष्वस्रीयभार्या॥ मामतूर् बा॒यि काकञ्। मातुलपुत्रभार्या॥ पितूर् बा॒यि काकञ्। पैतृव्यभार्या॥

॥ ब्यञ्बोयुशब्दाभ्यां पुमपत्ये थूर्न्त्ययोर्नबौ च ॥११॥

ब्यञ्बोयुशब्दयोः पुमपत्येऽभिधेये सति थूर् प्रत्ययो भवति अन्त्याक्षरयोश्च क्रमेण नकारबकारादेशौ भवतः॥ ब्यन थूर्। भागिनेयः॥ बाब थूर्। भ्रातृव्यः॥

॥ स्त्र्यपत्ये ज़ो नवौ च ॥१२॥

तयोर्ब्यंज़्वोयुशब्दयोः स्त्र्यपत्ये ऽभिधेये सति ज़ प्रत्ययो भवति अन्त्याक्षरयोश्च नकारवकारौ भवतः॥ ब्यनज़्। भागिनेयी॥ बाव्ज़्। भ्रातृपुत्री॥

॥ द्रियुशब्दस्य ध्यारादेशश्च ॥१३॥

देवरवाचकस्य द्रियुशब्दस्य पुंस्त्र्यपत्ये ऽभिधेये पूर्वोक्तौ प्रत्ययौ भवतः। द्रियुशब्दस्य च ध्यार आदेशः स्यात्॥ ध्यारथ्र्। देवरपुत्रः॥ ध्यारज़्। देवरपुत्री॥

॥ तदस्यास्तीत्यलादयः ॥१४॥

तत् अस्ति अस्य इत्यस्मिन्नर्थे वक्ष्यमाणा अलादयः प्रत्ययाः स्युः॥

स्वमूर्तिवर्तमानद्रव्यगुणवत्त्वाभिधेये ऽल् ॥१५॥

प्राणिनो ऽप्राणिनो वा निजमूर्तौ वर्तमानं यद्द्रव्यं गुणो वा तद्वत्त्वेन तस्मिन्नभिधेये सति द्रव्यशब्दाद्गुणशब्दाच्च अल् प्रत्ययो भवति। न चात्र गुणशब्देन शुक्लादिगुणा गृह्यन्ते इति॥ दार्यल्। श्मश्रुलः॥ गोंछ्ल्। गुम्फवान्॥ डखल्। काकपक्षवान्॥ थबल्। स्तनवती॥ कोछल्। कोष्ठवान्॥ ह्यङ्ल्। शृङ्गी॥ ठूँकल्। शृङ्गाघाती॥ ढ्वलल्। शृङ्गाघाती॥ च्रपल्। दन्ताघाती॥ फशल्। वेशवान्॥ ग्यज़ल्। वलिनः॥ स्यसल्। सीमावान्॥ प्वंदल्। क्षुतवान्॥ मछ्यस्यचल्। तिलकालकः॥ च्रासल्। कासवान्॥ च्रूँटल्। पर्दी॥ साधनं पूर्ववत्॥

॥ ह्याचो ऽभियोक्तरि ॥१६॥

अभियोगकर्त्रर्थे ह्याच् शब्दादल् भवति न त्वभियोज्यार्थे॥ ह्याचल्। अभियोक्ता॥

॥ ज़्यवः सूचके ॥१७॥

ज़्यव् शब्दात्सूचकार्थे अल् प्रत्ययो भवति॥ ज़्यवल्। सूचकः॥ न तु जिह्वावान्। किंतु तत्र। ज़्यविर्स्तु। वा ज़्यविवोलु (सू० २४) इति भवति॥

॥ ब्यञ्कूरुशब्दाभ्यामश्लीले ॥१८॥

स्पष्टम्॥ ब्यञल्। कोर्यल्॥ अश्लीले किम्। ब्यञ्वोलु (सू० २४)। भगिनीवान्॥ कोरिवोलु। कन्यावान्॥

॥ दारुशब्दाद्यागमो वा ॥१९॥

स्पष्टम्॥ दारियाल्। श्मश्रुलः॥

॥ क्वचिल्लदपि ॥२०॥

द्रव्यगुणवत्त्वे ऽभिधेये सति क्वचित् लद् प्रत्ययो ऽपि भवति। स च प्रायो दोष एव॥ फकलद्। दुर्गन्धः॥ छ्वकलद्। विदग्धः॥ छ्वकलद्। व्रणी॥ बकलद्। भषणवान्॥ द्वखलद्। दुःखी॥ द्रागलद्। दुर्भिक्षहतः॥ क्वचिद्ग्रहणात्। गोंछलद्। डखलद्। बबलद्। इति न भवति। किंतु ग्यञलद्। स्यसलद्। च्वासिलद्। इत्यादीनां द्वयमेव भवति॥

॥ फश उन्मादिनि ॥२१॥

फश्शब्दादुन्मत्तस्यार्थे लद् भवति ॥ फशलद् । उन्मत्तकल्पः ॥ अन्यत्र । फशल् । वेशकारी ॥

॥ पंज़ुअपंज़ुशब्दाभ्यां योरु ॥२२॥

आभ्यां शब्दाभ्यां सहितत्वे वाच्ये योरु प्रत्ययो भवति ॥ पंज़ियोरु । सत्यवक्ता ॥ अपंज़ियोरु । असत्यवक्ता ॥

॥ मंन्ज़्युम्शब्दाद्दूतार्थे ॥२३॥

दूतस्यार्थे मंन्ज़्युम्शब्दात् योरु प्रत्ययो भवति ॥ मंन्ज़्युम्योरु । दूतः ॥

॥ मूर्तिग्राह्यवस्तुवत्त्वे वोलुग्राकौ ॥२४॥

निजमूर्तेर्भिन्नैर्वस्तुभिः सहितत्वे अभिधेये ग्राक्वोलु प्रत्ययौ भवतः ॥ धारवोलु । धनवान् ॥ लरिवोलु । गृहवान् ॥ शायिवोलु । स्थानवान् ॥ कोरि-वोलु । कन्यावान् ॥ न्यचिविवोलु । पुत्रवान् ॥ गुपन्वोलु । गोपशुवान् । इत्यादि ॥ एवं । लरिग्राख् । इत्यादिस्वरूपाणि भवन्ति ॥ गरशब्दस्य गृहाध्यक्षार्थेऽकार-लोप इष्यते ॥ गर्वोलु । गृहाधिपः ॥ अन्यत्र । गरवोलु । गृहवान् ॥

॥ जीवादिभ्यथाकारिभ्यो हंतु ॥२५॥

यैयैरान्तरीयैर्बाह्यैर्वा वस्तुभिर्जीवादिनैव पीडा भुज्यते न तु देहेन तत्सा-हित्ये अभिधेये सति हंतु प्रत्ययः स्यात् ॥ न्यंद्रिहंतु । निद्राहतः ॥ त्रेषहंतु । तृषाहतः ॥ ब्वछहंतु । बुभुक्षाहतः ॥ क्रूदहंतु । क्रोधाहतः ॥ शुमहंतु । स्वेदा-हतः ॥ तापहंतु । आतपाहतः ॥ तूरिहंतु । शीताहतः ॥ आरहंतु ।

दयाहतः ॥ लवहंतु । [जलकणाहतः ॥] तावहंतु । [दाहहतः ॥] इति द्वयमन्यस्मिन्नपि विशेषणीक्रियते । तावहंत्रू बुतराथ् । [दाहहता पृथ्वी इति ॥]

॥ मंदछमोदमानेभ्यो व्यंतु ॥२६॥

एभिस्त्रिभिः शब्दैः सहितत्वे अभिधेये व्यंतु प्रत्ययो भवति ॥ मंदछव्यंतु । मन्दाक्षयुतः ॥ मोदव्यंतु । आदरयुतः ॥ मानव्यंतु । मानयुतः ॥

॥ वर्साशब्दादाढ्यार्थे ॥२७॥

स्पष्टम् ॥ वर्सांव्यंतु । आढ्यः ॥

॥ दन्दनस्तोरनिष्टार्थे आन् ॥२८॥

दंद्नस्त्शब्दाभ्यामनिष्टार्थाभ्यां सहितत्वे ऽभिधेये सति आन् प्रत्ययो भवति ॥ दंदान् । दन्तुरः ॥ नस्तान् । दुर्नासिकः ॥

॥ उ् वा ॥२९॥

आभ्यां शब्दाभ्यां विकल्पेन ऊ् प्रत्ययो भवति ॥ नंस्तु । दंदु ॥ पक्षे । नस्तूरु । दंदूरु ॥

॥ यड्शब्दात्तुन्दावल् ॥३०॥

स्पष्टम् ॥ यडल् । तुन्दिलः ॥

॥ जिघत्सावलोपश्च ॥३१॥

स्पष्टम् ॥ यड्ल् । कुक्षिंभरिः ॥

॥ हर्शब्दात्ताच्छील्ये ॥३२॥

अस्माच्छब्दात्तच्छीले अर्थे अल् प्रत्ययो ऽकारलोपश्च स्यात् ॥ ह्रल् ।
कलहशीलः ॥

॥ जत्शब्दात्तद्वति ॥३३॥

स्पष्टम् ॥ जत्ल् । रोमवान् ॥

॥ वैंसो जैवातृके ऽट् ॥३४॥

वैंस्शब्दादायुष्मत्त्वे ऽभिधेये अट् प्रत्ययो भवति ॥ वैंसट् । आयुष्मान् ॥

॥ ईषस्ताच्छील्ये ॥३५॥

ईष्शब्दात्ताच्छील्यार्थे अट् प्रत्ययो भवति ॥ ईषट् । ईर्ष्यालुः ॥

॥ अंछिशब्दादिड्दुर्दृष्टाविट् ॥३६॥

दुर्दृष्टौ पुरुषे ऽभिधेये सति अंछिशब्दात् इट् भवति ॥ अछीट् । दुर्दृष्टिः ॥

॥ रूपलूबाभ्यामतिशये ॥३७॥

रूपलूब्शब्दयोर्भूरिवत्त्वे ऽभिधेये सति इट् प्रत्ययो भवति ॥ रूपिट् ।
अतिसुन्दरः ॥ लूबिट् । लोलुभः ॥

॥ ज़्यवश्च ॥३८॥

ज़्यविट् । सूचकः ॥

॥ ल्यकल्शब्दादूठ् ॥३९॥

स्पष्टम् ॥ ल्यकलूठ्। अश्लीलदः ॥

॥ भावे ॥४०॥

इत उत्तरं ये प्रत्ययास्ते भावे विज्ञेयाः ॥ भावस्तु संज्ञाभावधातुभावभेदाद्विविधः। संज्ञाभावे अधिकारो ऽयम्। धातुभावस्तु कृत्प्रक्रियायां निरूपयिष्यते ॥

॥ विशेष्यायत्तानामर् ॥४१॥

विशेष्यस्य भेद्यस्य अधीना ये विशेषणशब्दास्तेषां भावे अर् प्रत्ययो भवति। उदाहरणान्यग्रे सर्वत्र ॥ रुतुशब्दस्य तु देहशुभतायामेव भावप्रत्ययः स्यादिति वेद्यम् ॥

॥ त्र्यक्षराधिकानामार् ॥४२॥

ते नित्यविशेष्यनिघ्नाः शब्दाश्चेत् त्र्यक्षरास्तदधिका वा स्युस्तदा आर् प्रत्ययो भवति ॥ व्वज़्ज्यार्। रक्तता ॥ म्वकज्यार्। मुक्तता ॥

॥ टोठोर्वा ऽनागमो ऽन्त्यस्वरलोपश्च ॥४३॥

टोठुशब्दाद्विकल्पेन आर् प्रत्ययः अन् आगमश्च भवति अन्त्यस्योकारस्य च लोपः स्यात् ॥ टाठञार्। प्रियता ॥ अत्र लिङ्गस्य अनागमव्यवहितत्वात् टवर्गान्तानां च (सू० ४९) इत्यनेन ठकारस्य छकारो न भवति किंतु तवर्गान्तानामप्रसिद्ध (सू० ५०) इत्यनेन नकारस्य ञकारः। पक्षे। टाछ्चर्। प्रियता ॥

॥ क्वचित्पूर्व एव ॥४४॥

त्र्यक्षराधिकानां क्वचित्स्थाने पूर्वः अर् प्रत्यय एव भवति ॥ अपज़र् । असत्यता ॥ क्रहज़र् । कार्ष्ण्यम् ॥ काव्रर्यर् । कपिलता ॥ कावर्यर् । नीलता ॥ क्रपज़र् । कार्पण्यम् ॥ कायर्यर् । असारता ॥ खोवर्यर् । वामता ॥ ग्यश्याम्यर् । श्यामता ॥ ज़त्र्यर् । चतुरता ॥ विसम्यर् । विषमता । इत्यादि ॥

॥ हशो ऽश्लीले ॥४५॥

हश्शब्दादश्लीले ऽर्थे अर् भवति ॥ हशर् । गालिदानेन श्वश्रूत्वम् ॥ अश्लीले किम् । हशतोनु । श्वश्रूत्वम् ॥ (सू० ६३) तोनु प्रत्ययः ॥

॥ क्वंबुगंशुभ्यां वा लोपः ॥४६॥

आभ्याम् शब्दाभ्यां विकल्पेन भावप्रत्ययलोपः स्यात् ॥ क्रब्यर् । कुब्जता ॥ गश्यर् । जालमता ॥ पक्षे । क्वंबु । कुब्जता ॥ गंशु । जालमता ॥

॥ कवर्गान्तानां चवर्गादेशः क्रमात् ॥४७॥

तेषां विशेष्यनिघ्नानां द्व्यक्षराणां त्र्यक्षराणां च अन्त्यस्य उकारविशिष्टस्य कवर्गीयाक्षरस्य क्रमेण चवर्गीयाक्षरादेशो भवति ॥ निकु । निच्यर् । क्षुद्रत्वम् ॥ टंकु । टच्यर् । तैक्ष्ण्यम् ॥ ह्वंखु । ह्वछ्यर् । शुष्कता ॥ त्र्युखु । त्रिछ्यर् । दक्षता ॥ द्वंगु । द्वज्यर् । दुर्लभता ॥ स्वंगु । स्वज्यर् । सुलभता ॥ निकुशब्दाद्विशेष्यायत्तानामर् (सू० ४१) अनेन ककारस्य चकारः । उवर्णान्तानामिकारः (सू० २।१।३०) यत्वम् । त्र्युखुशब्दोपधायुकारस्य इकारः (सू० २।१।७६) । सर्वत्र यत्वम् ॥

॥ न च्वंकुखूँखुशब्दयोः ॥४८॥

च्वंकुशब्दखूँखुशब्दसंबन्धिनोः ककारखकारयोश्चवर्गादेशो न भवति॥ च्वंकु। च्वक्यर्। अम्लत्वम्॥ खूँखु। खूँख्यर् [। अवनाटवद्वचनम्]॥

॥ टवर्गान्तानां च ॥४९॥

टवर्गान्तानां विशेष्यनिघ्नानां शब्दानां च क्रमेण चवर्गादेशो भवति॥ म्वंटु। म्वच्यर्। स्थौल्यम्॥ गंटु। गच्यर्। अल्पोज्ज्वलता॥ द्रौंठु। द्राँछ्यर्। कठोरता॥ मूँठु। मैँछ्यर्। मन्दता॥ म्वंडु। म्वंज्यर्। कुण्ठता॥ बंडु। बज्यर्। महत्ता॥ प्रोणु। प्राञर्। पुराणता॥

॥ तवर्गान्तानामप्रसिद्धः ॥५०॥

तवर्गान्तानां विशेष्यनिघ्नानां शब्दानामन्त्याक्षरस्य क्रमेणाप्रसिद्धश्चवर्गादेशो भवति अप्रसिद्धो दन्त्यः॥ तंतु। तच़र्। तप्तता॥ मंतु। मच़र्। मत्तता॥ वंथु। वछ़र्। विस्तृतता॥ थंदु। थज़र्। औन्नत्यम्॥ मंदु। मन्ज़र्। मान्द्यम्॥ तंनु। तञ़र्। तनुता॥ गुमंनु। गुमञ़ार्। ईषन्मालिन्यम्॥ तमंनु। तमञ़ार्। कार्ष्ण्यम्॥ तूरंनु। तूरञ़ार्। शीतता॥ कटमलिनु। कटमलिञ़ार्। धूसरता॥ पनुनुशब्दस्यादिस्वरस्य दीर्घ इष्यते॥ पानञ़ार्। आत्मीयता॥

॥ अप्रसिद्धादिलोपः ॥५१॥

अप्रसिद्धाच्चवर्गात् इकारस्य लोपो भवति उदाहरणानि पूर्वसूत्रोक्तानि अप्रसिद्धचवर्गात्परस्य इकारस्य लोपः स्वयं बुद्धिमता निर्णेयः॥ छ्वंचु। छ्वच़र्। रिक्तता॥ अंछु। अछ़र्। नैर्बल्यम्॥ पंजु। पज़र्। सत्यता॥ अंनु। अञ़र्। अन्धता॥

॥ लान्तानां जः ॥५२॥

लकारान्तानां विशेष्यनिघ्नानामन्त्यस्य जकारो भवति ॥ खलु। खज्यर्। विस्तृतत्वम्॥ [वूलु।] वोज्यर्। चाञ्चल्यम्॥ कुमुलु। कुमज्यार्। कोमलता॥ एवं। व्वज़्ज्यार्। उज्ज्वलता॥ म्वकज्यार्। मुक्तता॥ ज़ायुज्यार्। सूक्ष्मता॥ पिशज्यार्। पेशलता॥ लान्तानां किम्॥ बियुयर्। पर्युषितत्वम्॥ च्रयर्। आधिक्यम्॥ फइर्यर्। पारुष्यम्॥ नव्यर्। नवीनता॥

॥ त्रकुरुशब्दस्य च ॥५३॥

अन्त्यव्यञ्जनस्य रकारस्य जकारो भवति॥ त्रकज्यार्। कठोरता॥ पक्षे। त्रकर्यर्॥

॥ हान्तानां शः ॥५४॥

स्पष्टम्॥ हिहु। हिश्यर्। सादृश्यम्॥ च़ोहु। च़ाश्यर्। कटुता॥ हान्तानां किम्। गश्यर्। जालमता॥ च़ाष्यर्। कटुत्वम्॥ फ्रिश्यर्। पारुष्यम्॥

॥ सान्तानां वा छः ॥५५॥

स्पष्टम्॥ कूँसु। कैँछ़र्। कनिष्ठता॥ पक्षे॥ कैँसर्। कनिष्ठता॥ पवर्गान्तान्युदाहरणानि यथा॥ पंपु। पप्यर्। पक्कता॥ फंफु। फफ्यर्। लोहलत्वम्॥ ग्वबु। ग्वब्यर्। गुरुत्वम्॥ ओमु। आम्यर्। आमता। इति॥

॥ बंडुशब्दादीमी वा ॥५६॥

बंडुशब्दात्परो विकल्पेन ईमी प्रत्ययो भवति। आदेशाभावश्च॥ बंडु। बडीमी। महत्ता॥ पक्षे। बज्यर्। इति॥

॥ श्रूचुछ्यंट्टुशब्दाभ्यां यांरू च ॥५७॥

आभ्यां शब्दाभ्यां पक्षे भावे यांरू च भवति ॥ श्रूचु । श्रूच्रियांरू । शुद्धता ॥ छ्यंट्टु । छ्यंट्टियांरू । उच्छिष्टता ॥ पक्षे । श्रोच्नर् । छ्यच्यर् ॥ इति भवतः ॥

॥ योरुशब्दान्ताज्ज़् ॥५८॥

योरुशब्दाद्भावविषये ज़् प्रत्ययो भवति ॥ मंज़िमूयार्ज़् । दूतता ॥ पंज़ियार्ज़् । सत्यता ॥ अपंज़ियार्ज़् । असत्यता ॥ यार्ज़् । मित्रता ॥ श्रूच्रियार्ज़् । शुद्धता ॥ छ्यट्टियार्ज़् । अशुद्धता ॥

॥ विशेष्यानायत्तानामिल्आंज़्प्रत्ययौ ॥५९॥

भावे इत्यनुवर्तते स्वयं विशेष्यशब्दानां भावे अभिधेये इल् प्रत्ययः आंज़् प्रत्ययश्च भवति ॥ पंण्डितांज़् । पण्डितता ॥ पक्षे । पंण्डितिल् ॥ छांनिल् । वा । छानांज़् । तक्षकता ॥ गूरिल् । वा । गोरांज़् । पुरोहितता । इत्यादि ॥

॥ क्वचिदेकतरः ॥६०॥

क्वचिच्छब्दे एकतर एव प्रयुज्यते ॥ द्रंमिलांज़् । लेपकता ॥ द्रंसिलिल् । इति न साधुशब्दः ॥

॥ क्वचिद्युगपच्च ॥६१॥

क्वचित्स्थाने प्रोक्तौ प्रत्ययौ युगपत्प्रयुज्येते ॥ मतिल् । वा । मंतिलांज़् ।

[६१। युगपच्छब्दो ऽत्रोभयार्थको ज्ञेयः न तु समवायार्थकः समवेतयोः प्रत्यययोरेकस्माच्छब्दात्प्रयोगासंभवात् ॥]

उन्मत्तता ॥ अत्र मंतुशब्दस्य विशेष्यनिघ्नत्वात्पूर्वं मच्चर्स्वरूपे सिद्धे ऽपि प्रोक्तकर्मार्थमेव पुनरुदाहृतम्॥ गूरिलांज़्। छांनिलांज़्। ब्रीठिलांज़्। इत्यादि॥

॥ लाँछ्शब्दस्योपधाया ऊत्वं वा ॥६२॥

लूँछ्लि्। पक्षे। लाँछिल्। नपुंसकता ॥

॥ संबन्धिनां तोनु ॥६३॥

नाडीसंबन्धिनां भावे अभिधेये सति तोनु प्रत्ययो भवति॥ मांलितोनु। पितृत्वम्॥ माजितोनु। मातृत्वम्॥ बांयितोनु। भ्रातृत्वम्॥ पुतरतोनु। पुत्रत्वम्॥ हशतोनु। श्वश्रूत्वम्। इत्यादि॥ कृत्रिमसंबन्धिनां भावे तु तकारस्य पकार इष्यते॥ व्यसपोनु। वयस्यात्वम्॥ दायपोनु। धात्रीत्वम्॥ पांजि-पोनु। नीचत्वम्। इत्यादि॥

॥ शत्रुमित्रपितुर्ऋषिबन्धुभ्य उत् ॥६४॥

एषां शब्दानां भावे गम्यमाने सति उत् प्रत्ययो भवति॥ शत्रुत्। शत्रुत्वम्॥ म्यत्रुत्। मित्रत्वम्॥ पितुरुत्। सजातीयत्वम्॥ ऋष्युत्। ऋषित्वम्॥ बन्दुत्। बन्धुत्वम्॥

॥ मैत उन् ॥६५॥

शवत्राचकात् मैत्शब्दाद्भावे उन् प्रत्ययो भवति॥ मैत्। मैतुन्। शवता॥

॥ म्वंड्शब्दादुस् ॥६६॥

विधवावाचकात् म्वंड्शब्दाद्भावे उस् प्रत्ययो भवति॥ म्वंडुस्। वैधव्यम्॥

॥ द्बुशब्दात्सृगार्थे ॥६७॥

स्पष्टम् ॥ द्बुस् । सृगः ॥ अन्यत्र । द्बिल् । रजकता ॥

॥ स्वन्शब्दाद्दु ॥६८॥

स्पष्टम् ॥ स्वनद्दु । सापत्न्यम् ॥

॥ बोजुशब्दाद्दठ् च ॥६९॥

अस्माच्छब्दात् बद् प्रत्ययो भवति पक्षे बंद्दु प्रत्ययश्च स्यात् ॥ बाजिबंद्दु । साधारणता ॥ पक्षे । बाजिवद् । साधारणता ॥

॥ हतादिभ्यः संख्यायाम् ॥७०॥

हत्आदीनां संख्यावाचकानां बंद्दु प्रत्ययो भवति ॥ हतबंद्दु । शतशः ॥ सासबंद्दु । सहस्रशः ॥ लछ्यबंद्दु । लक्षशः । इत्यादि ॥

॥ शाकादिभ्यो मुष्ट्यर्थे ॥७१॥

शाकानां मुष्टावभिधेयायां सत्यां बंद्दु प्रत्ययो भवति ॥ हाकबंद्दु । शाकमुष्टिः ॥ मुजिबंद्दु । मूलिकामुष्टिः ॥ ग्वग्जिबंद्दु [। सर्षपशाकमुष्टिः] ॥

॥ उलु ॥७२॥

अधिकारो ऽयम् ॥ इत उत्तरं वक्ष्यमाणार्थेषु उलु प्रत्ययो भवति ॥

॥ गाटशब्दान्निपुणे ॥७३॥

स्पष्टम् ॥ गाटुलु । निपुणः ॥

॥ क्कंडो ऽल्पार्थे ॥७४॥

क्कंड् इति । बृहत्कुण्डं । तस्याल्पार्थे उल्ल प्रत्ययो भवति । क्कंडुल्लु । कुंडलाकृतिः ॥

॥ गंडो वस्तुसाकल्ये ॥७५॥

वस्तुनः साकल्ये अभिधेये ग्रन्थिवाचकाद्गंड्शब्दात् उल्ल प्रत्ययो भवति ॥ गंडुल्लु । वस्तुसामस्त्यम् ॥

॥ ग्तृशब्दादतिशये ॥७६॥

नदीप्रवाहवाचकात् ग्तृशब्दादतिशये ऽर्थे उल्ल भवति ॥ ग्तुल्लु । बहुलम् ॥

॥ गदश्च ॥७७॥

स्पष्टम् ॥ गदुल्लु । बहुलम् ॥

॥ टंठुशब्दान्मानावपने ॥७८॥

द्रोणद्वयवाचकात् टंठुशब्दात्परिमाणभाण्डार्थे उल्ल प्रत्ययो भवति ॥ टठुल्लु । काष्ठावपनम् ॥

॥ द्वंगुप्वंतुशब्दाभ्यां सादृश्ये ॥७९॥

द्वंगु । मुष्टिः ॥ प्वंतु । अर्भकः ॥ आभ्यां सादृश्यार्थे उल्ल प्रत्ययो भवति ॥ द्वगुल्लु । पिण्डम् ॥ प्वतुल्लु । शिलामयी मूर्तिः ॥

॥ म्वलसादोस्तद्वति ॥८०॥

स्पष्टम ॥ म्वलुल्लु । बहुमूल्यम् ॥ सादुल्लु । स्वादवान् ॥

॥ क्रछ्शब्दाद्भारिके ॥८१॥

स्पष्टम् ॥ क्रछुलु । भारवाहः ॥

॥ छ्वक्शब्दात्स्पष्टतायाम् ॥८२॥

छ्वक् । शोधना । तस्मात्स्पष्टार्थे उलु प्रत्ययो भवति ॥ छ्वकुलु । गद्गदम् ॥

॥ च्रट्शब्दाच्चौरे ॥८३॥

च्रट् । छदनम् । तस्माच्चौरार्थे उलु भवति ॥ च्रटुलु । चौरः ॥

॥ पत्शब्दादुडुपे ॥८४॥

स्पष्टम् ॥ पतुलु । उडुपः ॥

॥ च्वच्छब्दात्स्वव्यभिचारे ॥८५॥

गुदवाचिनः च्वत्शब्दात्स्वव्यभिचारकारयितरि उलु स्यात् ॥ च्वतुलु । स्वव्यभिचारकारयिता । गांडू ॥

॥ रात्दुहोस्तत्काले ॥८६॥

रात्दुह्शब्दाभ्यां तत्तत्काले ऽभिधेये उलु प्रत्ययः स्यात् ॥ रातुलु । निशाकालः ॥ दुहुलु । दिनकालः ॥

॥ मून्शब्दाद्वस्त्रे ॥८७॥

उपधाह्रस्वश्च निपात्यते ॥ मुनुलु । और्णं वासः ॥

॥ युलु ॥८८॥

इत उत्तरं वक्ष्यमाणार्थेषु युलु भवति ॥ अधिकारो ऽयम् ॥

॥ टंपुजटोर्जटाधारिणि ॥८९॥

टंपुशब्दात् जट्शब्दाच्च तद्धारिणो ऽर्थे युलु स्यात् ॥ टंप्युलु । जटाधारी ॥ जट्युलु । जटाधारी ॥

॥ दाहः करुणायामुपधाह्रस्वश्च ॥९०॥

स्पष्टम् ॥ दह्युलु छुह् वदान । सकरुणं रोदिति ॥

॥ रसात्तद्वति ॥९१॥

स्पष्टम् ॥ रस्युलु छुह् ग्यवान । सरसं गायति ॥

॥ मछ्स्निहोः स्नेहवति ॥९२॥

मछ् इति । सान्त्वनं । स्निह् इति स्नेहस्तयोः शब्दयोः युलु प्रत्ययो भवति ॥ मछ्युलु । सस्नेहः ॥ स्निह्युलु । सस्नेहः ॥

॥ मिषान्नखमांसलेशे ॥९३॥

स्पष्टम् ॥ मिष्युलु । नखमांसलेशः ॥

॥ स्यकः स्वादादिसादृश्ये ॥९४॥

स्यक् । सिकता । तत्सादृश्येन स्वादादावभिधेये युलु प्रत्ययः स्यात् ॥ स्यक्युलु चूँटु । सिकतास्वादसदृशः पालीवतः ॥ स्यकिजू बुतराथ् । सैकतिला भूमिः ॥

॥ मांजूशब्दादपत्रपिष्णौ ॥९५॥

मातृवाचकात् मांजूशब्दात् लज्जावदर्थे युलु प्रत्ययः स्यात्॥ माञ्युलु। लज्जावान्॥

॥ मलाद्युनु तद्वति ॥९६॥

मलशब्दात्तद्वदर्थे युनु प्रत्ययो भवति॥ मल्युनु। मलिनः॥

॥ कूटुशब्दादल्पार्थे उनु ॥९७॥

कूटु। बृहत्काष्ठं। तस्याल्पार्थे उनु प्रत्ययो भवति॥ कूटुनु। क्षुद्रकाष्ठम्॥

॥ दगादायुधे ॥९८॥

दग्। घातः। तस्मादायुधार्थे उनु प्रत्ययो भवति॥ दगुनु। मृगः॥

॥ रंग्स्वन्मन्चम्दाँद्काँद्भ्यः शिल्पिनि र्॥९९॥

एभ्यः शब्देभ्यः शिल्पिनि अर्थे र् प्रत्ययो भवति॥ रंग्र्। रजकः॥ स्वन्र्। स्वर्णकारः॥ मन्र्। शाङ्खिकः॥ चम्र्। चर्मकारः॥ दाँदुर्। शाकविक्रयी॥ काँदुर्। कान्दविकः॥

॥ डारुफासोर्विनाशकभेदकयोः ॥१००॥

स्पष्टम्॥ डासर्। विनाशकः॥ फासर्। भेदकः॥

॥ बंगात्तत्पायिनि ॥१०१॥

बंगशब्दात्तत्पायिनि अर्थे र् प्रत्ययो भवति॥ बंगर्। भङ्गापः॥

॥ बमो ऽन्तरायिणि ॥१०२॥

बम्शब्दाद्विघ्नकारके ऽर्थे र् प्रत्ययः स्यात् ॥ बम्र् । विघ्नकृत् ॥

॥ लमो विलम्बके ॥१०३॥

लमशब्दाद्विलम्बकर्त्रर्थे र् प्रत्ययो भवति ॥ लम्र् । विलम्बकः ॥

॥ लाबो वार्धुषिके ॥१०४॥

लाब्शब्दात् उक्तार्थे र् प्रत्ययः स्यात् ॥ लाब्र् । वृद्ध्याजीवः ॥

॥ सालो जन्ये ॥१०५॥

साल्शब्दान्निमन्त्रितजन्यार्थे र् प्रत्ययो भवति ॥ साल्र् । जन्याः ॥

॥ लूटो लुण्ठके ॥१०६॥

लूट्शब्दात् लुण्ठकार्थे र् प्रत्ययः स्यात् ॥ लूट्र् । लुण्ठकः ॥

॥ भ्रमो भ्रमप्रदे ॥१०७॥

स्पष्टम् ॥ भ्रम्र् । भ्रमदः ॥

॥ लूबो ऽन्त्यस्य दश्च ॥१०८॥

लूब्शब्दात्तद्वत्त्वार्थे र् प्रत्ययो भवति अन्त्यस्य बकारस्य च दकारो भवति ॥ लूद्र् । लोलुभः ॥

॥ तौल्यपरिमिते युन् ॥१०९॥

तुलया परिमिते वस्तुनि युन् प्रत्ययो भवति । तच्च द्विधा । एकं स्वयं वस्तु

कियदस्तीति द्वितीयं कियन्मितस्य वस्तुन आधारभूतमस्तीत्यनयोर्द्वयोरेव योगारम्भः ॥ त्रां॑क्युनु कद् । द्रौणिको मेषः ॥ सीर्युनु थाल् । प्रास्थिकः स्थालः ॥ खा॑र्युनु बोरु । खारिको भारः ॥ ला॑क्युनु नंहु । द्रौणिकः कुम्भः ॥ सीर्युनु बान । प्रास्थिकं भाण्डम् ॥ अत्र त्रख्शब्दस्योपधाया दीर्घः सेर्शब्दस्य एकारस्य ईकारो दृश्यते । प्रस्थवाची सीर्युनु शब्दः पलवाची पल्शब्दापरपर्यायः पल्युनुशब्दश्चेतरावबधार्यौ ॥ अन्यत्र । च्वलोकु । चतुर्द्रोणिकः ॥ च्वत्रां॑क्युनु । चातुर्द्रौणिकः ॥

॥ पाँज़ुवुशब्दस्य वस्य शश्च ॥११०॥

द्रोणार्धवाची पाँज़ुवुशब्दस्तत्तौल्येनाभिहिते वस्तुनि युनु प्रत्ययो भवति वकारस्य च शकारो भवति ॥ पाँज़शुनु । अर्धद्रौणिकः ॥

॥ षष्ट्यादेर्मौल्यसंख्यायां च ॥१११॥

मौल्यसंख्यया वस्तुनि अभिधेये सति षष्टेः परतः युनु प्रत्ययो भवति ॥ शीठ्युनु । षाष्टिकः ॥ सतत्युनु । साप्ततिकः ॥ षष्ट्यादेः किम् ॥ दहन् हंन्दु दाँदु । दशानां वृषः ॥

॥ सर्वनामशब्देभ्यश्च ॥११२॥

तीत्युनु । तावतिकः ॥ यीत्युनु । यावतिकः ॥ कूत्युनु । कियतिकः ॥ ईत्युनु । एतावतिकः ॥

॥ वर्षार्थे च ॥११३॥

वा॑र्ष्युनु । वार्षिकः ॥

॥ संख्यायाश्च पूरणे युमु ॥११४॥

संख्यायाः पूरणेऽर्थे युमु प्रत्ययो भवति चशब्दात्सर्वनामशब्देभ्यश्च ॥ अक्युमु। प्रथमः ॥ दह्युमु। दशमः ॥ वुह्युमु। विंशः ॥ हत्युमु। शततमः ॥ सास्युमु। सहस्रतमः ॥ पुंस्त्रियोः कतिशब्दवाचकाभ्याम् कंचूकच्चशब्दाभ्यामपि विज्ञेयः ॥ कड्युमु। कतमः ॥ यीत्युमु। यतमः ॥ तीत्युमु। ततमः ॥ ईत्युमु। इतमः ॥ स्त्रीलिङ्गे तु युकारस्य इकारो भवति ॥ कचिमु। कतमा ॥ यीतिमु। यतमा ॥ इत्यादि ॥

॥ अष्टसंख्यावधि शतार्थे हत् ॥११५॥

स्पष्टम् ॥ अखहथ्। एकशतम् ॥ जुहहथ्। शतद्वयम् ॥ त्रिहथ्। त्रिशती ॥ इत्यादि ॥

॥ तत्परतो हस्य शः ॥११६॥

नवसंख्यामारभ्य शतार्थे हकारस्य शकारो भवति ॥ नवशथ्। नव शतानि ॥ काहशथ्। एकादश शतानि ॥ बाहशथ्। द्वादश शतानि ॥ इत्यादि ॥

॥ देशभवे इ् प्रत्ययश्च ॥११७॥

स्पष्टम् ॥ खोवपूरि नाव्। सुय्यपुरजा नौः ॥ ईरा॑नि गुरु। ईरानदेशजोऽश्वः ॥ चीनि खोसु [। चीनदेशभवः कंसः] ॥ हिन्दुस्ता॑नि कपुर्। इत्यादि ॥

॥ कशीर्देशभवे उरु अन्त्यस्वरादिलोपोपधादीर्घौ च ॥११८॥

काश्मीरभाषायां कश्मीरः कशीर् इति स्त्रीलिङ्गवाची शब्दः कथ्यते। तस्या उद्भूते वस्तुनि अभिधेये सति उरु प्रत्ययो भवति अन्त्यस्वराद्यवयवस्य लोप

उपधायाश्च दीर्घो भवति ॥ कांशुरु कंग्। काश्मीरं कुङ्कुमम् ॥ कांशुरु पश्मीन । काश्मीरं बहुमूल्यम् [राङ्कवम्] ॥ कांशिरू कट्। काश्मीरं कुष्ठम् । इत्यादि ॥

॥ देशकालभवे चोकु अस्त्रियाम् ॥११९॥

देशभवे कालभवे च वस्तुनि अभिधेये उकु प्रत्ययो भवति स्त्रीलिङ्गं वर्जयित्वा ॥ कत्युकु । कुत्रत्यः ॥ तत्युकु । तत्रत्यः ॥ इत्युकु । इहत्यः ॥ यत्युकु । यत्रत्यः ॥ हुत्युकु । अत्रत्यः ॥ गरुकु । गृह्यः ॥ करुकु । किंकालिकः ॥ रातुकु । ह्योभवः ॥ पर्सुकु । परारि भवः । इत्यादि ॥ अज़्शब्दादिकारागमश्चेष्यते ॥ अज़्युकु । अद्यतनः ॥

॥ मिलोपयुक्तात्पांरिप्रत्ययान्तात्सर्वनाम्नो युमु ॥१२०॥

उक्तप्रत्ययो भवतीति स्पष्टम् ॥ पांर्युमु । पारदेशजः ॥ कपांर्युमु । किंपार्श्वः ॥ तपांर्युमु । तत्पार्श्वः ॥ यपांर्युमु । यत्पार्श्वः ॥ हुपांर्युमु । अपारजः ॥ इपांर्युमु । एतत्पार्श्वः ॥ अपांर्युमु । पारजः ॥ अस्त्रियां किम् ॥ कतिचू । कुत्रत्या ॥ एवं । पांरिमू । पारजा ॥ इत्यादि ॥ दिग्भवे च दछिनुखोवुरुशब्दौ वर्जयित्वा युमु भवति ॥ ब्रूँठ्युमु । अग्रिमः ॥ पत्युमु । पश्चिमः ॥ हीर्युमु । वा । प्यठ्युमु । ऊर्ध्वः ॥ तल्युमु । वा । ब्वन्युमु । अधरः ॥ अंन्दूर्युमु । आन्तरः ॥ न्यबर्युम् । बाह्यः ॥ अद्वौ प्रोक्तौ किम् ॥ दंछिन्युकु । दक्षिणः ॥ खोव्र्युकु । वामः ॥

॥ समूहे ख्यंलु ॥१२१॥

स्पष्टम् । गोवूख्यंलु । गोसमूहः ॥ गुंरिख्यंलु । अश्वसमूहः ॥ गुपन्ख्यंलु । गोपशुसमूहः ॥ तींरिख्यंलु । मेषादिसमूहः ॥ ज़नानख्यंलु । स्त्रैणम् ॥ महनिविख्यंलु । मानुष्यकम् ॥ इत्यादि ॥

॥ लूकुशब्दादय् ॥१२२॥

लूकुशब्दात्समूहे अय् भवति ॥ लूकय् । जनता ॥

॥ पानशब्दादुनु उपधाह्रस्वश्च ॥१२३॥

स्पष्टम् ॥ पनुनु । आत्मीयः ॥

॥ परशब्दादुदु ॥१२४॥

स्पष्टम् ॥ परुदु । परकीयः ॥

॥ तिहादिभ्यः प्रकारोक्तौ थः ॥१२५॥

तिह्यिह्आदिभ्यः पञ्चभ्यः प्रकारवचने गम्यमाने थ प्रत्ययो भवति ॥ तिथ । तथा ॥ यिथ । यथा ॥ क्यथ । कथम् ॥ इथ । इत्थम् ॥ हुथ । इत्थम् ॥

॥ उपमाने थु ॥१२६॥

तिह्आदिशब्दैरुपमाने वाच्ये सति थु प्रत्ययो भवति ॥ तिथु । तादृशः ॥ यिथु । यादृशः ॥ किथु । कीदृशः ॥ इथु । एतादृशः ॥ हुथु । ईदृशः ॥ लिङ्ग-प्रकरणोक्तनिश्चयप्रत्ययान्ताश्च [सू० २।३।२१] यथा ॥ तिथय् । तथैव ॥ यिथय् । यथैव ॥ क्यथय् । कथमेव ॥ इथय् । इत्थमेव ॥ हुथय् । इत्थमेव ॥ एवं बुद्धिमता निश्चयार्थप्रत्ययस्य सर्वत्र प्राप्तिरवधार्या ॥

॥ तस्मात्परो पांठि पांठिन् वा ॥१२७॥

तस्मात्प्रकारप्रत्ययान्तात् परः पांठि प्रत्ययः पांठिन् प्रत्ययो वा प्रयोज्यः ॥

तिथपाठि । तथा ॥ यिथपाठि । यथा ॥ क्यथपाठि । कथम् ॥ इथपाठि । इत्थम् ॥ हुथपाठि । इत्थम् ॥ एवं । तिथपाठिन् । यिथपाठिन् । इत्यादि ॥

॥ अन्यतो ऽपि च ॥१२८॥

तौ पाठिपाठिन्प्रत्ययौ अन्येभ्यो ऽपि दृश्येते ॥ बियपाठिन् । इतरथा ॥ सारियपाठि । सर्वथा ॥ हंलिपाठि । वक्रप्रकारम् ॥ इत्यादि ज्ञेयम् ॥ एवं संबन्धषष्ठ्यन्तेभ्यः सर्वेभ्यः शब्देभ्यो बोध्यम् ॥

॥ क्याहो ह्रस्वः ॥१२९॥

क्याहशब्दस्य ह्रस्वो भवति ॥ क्यथपाठि । कथम् ॥ क्यथताङ्पाठि । केनापि प्रकारेण ॥

॥ प्राणिकृतादेशेभ्यो रंग च ॥१३०॥

प्राणिनो द्वितीयादीनामेकवचनेषु [सू० २।३।५] ये तमादय आदेशाः कृतास्तेभ्यः प्रकारवचने गम्यमाने रंग प्रत्ययो भवति चशब्दादन्येभ्यो ऽपि ॥ तमिरंग । तथा ॥ यमिरंग । यथा ॥ कमिरंग । कथम् ॥ इमिरंग । इत्थम् ॥ हुमिरंग । इत्थम् ॥ अमिरंग । इत्थम् ॥ अकिरंग । एकधा ॥ द्वयिरंग । द्विधा ॥ त्र्ययरंग । त्रिधा ॥ सारिरंग । सर्वथा ॥ यत्रिरंग । वा । सिठाहिरंग । बहुधा ॥ इत्यादि ज्ञेयम् । साधनं पूर्ववत् ॥

॥ प्रत्ययेषु हलोपः सर्वत्र ॥१३१॥

सर्वत्र लिङ्गप्रकरणे धातुप्रकरणे च प्रत्ययेषु परेषु हकारस्य लोपो भवति ॥ क्यथपाठिन् । कथम् ॥ क्याहशब्दात् थ प्रत्ययान्तात् पाठिन् प्रत्ययश्च अनेन हकारस्य लोपः । क्याहो ह्रस्व (सू० १२९) इत्यनेनाकारस्याकारः ॥

॥ अप्राणिभ्यः स्थाने इ प्रत्ययश्च ॥१३२॥

तेभ्यः अप्राणिकृतादेशेभ्यः सामान्यस्थाने गम्यमाने इ प्रत्ययो भवति ॥ तत्र पञ्चम्यां प्रसिद्धता सप्तम्यां तु पूर्वस्वरस्याप्रसिद्धता ॥ तति । तॅति । ततः । तत्र ॥ यति । यॅति । यतः । यत्र ॥ कति । कुतः । कुत्र ॥ इति । इॅति । अतः । अत्र ॥ हुति । हुॅति । अमुतः । अमुत्र ॥ अति । अॅति । अतः । अत्र ॥

॥ तस्मादनऽनसौ वा ॥१३३॥

तस्मात् इ प्रत्ययान्ताच्छब्दात् अन् प्रत्ययः अनस् प्रत्ययो वा भवति ॥ कत्यन् वा कत्यनस् । कुत्र ॥ तत्यन् वा तत्यनस् । तत्र ॥ यत्यन् वा यत्यनस् । यत्र ॥ अत्यन् वा अत्यनस् । अत्र ॥ एवमन्यत् ॥ अनसः सकारस्य नकारोऽपि दृश्यते ॥ यत्यनन् । यत्र ॥ अत्यनन् । अत्र ॥ एवमन्यत् ॥

॥ पञ्चम्यां प्यठान्तो ऽपि ॥१३४॥

स एव इ प्रत्ययान्तः शब्दः प्यठान्तो विशेषतः पञ्चमीप्रयोगो भवति ॥ ततिप्यठ । ततः ॥ यतिप्यठ । यतः ॥ कतिप्यठ । कुतः ॥ इतिप्यठ । इतः ॥ हुतिप्यठ । अमुतः ॥ गरप्यठ । गृहतः ॥ गामप्यठ । ग्रामतः ॥ इत्यादि ॥

॥ सप्तम्यामनन्तादी च ॥१३५॥

अन्प्रत्ययान्ताच्छब्दात्सप्तम्यां विशेषत ई प्रत्ययो ऽपि भवति ॥ तत्यनी । तत्र ॥ यत्यनी । यत्र ॥ कत्यती । कुत्र ॥ इत्यनी । अत्र ॥ हुत्यनी । अमुत्र ॥

॥ ओर्तुप्रत्ययौ वान्त्यलोपश्च ॥१३६॥

तेभ्यः अप्राणिकृतादेशेभ्यः शब्देभ्यः सप्तम्याम् ओर् प्रत्ययः तु प्रत्ययो

वा भवति। अन्त्याक्षरस्य च लोपो भवति। तु प्रत्ययस्योकारान्तत्वात्पूर्वस्वरस्याप्रसिद्धता ज्ञेया॥ तोर्। तत्र॥ योर्। यत्र॥ कोर्। कुत्र॥ योर्॥ अत्र॥ होर् वा ओर्। अमुत्र॥ एवम्॥ तंतु। यंतु। कंतु। इतु। हुतु। अंतु। विज्ञेयाः॥ तु प्रत्ययान्तात् त् प्रत्ययश्चेष्यते॥ ततुत्। यतुत्। कतुत्। इतुत्। हुतुत्। अतुत्। इत्यादि॥ यप्रत्यये ओकारस्य ऊकार इष्यते॥ तूर्य्। तत्रैव॥ यूर्य्। यत्रैव॥ कूर्य्। कुत्रैव॥ यूर्य्। अत्रैव॥ ऊर्य्। अमुत्रैव॥ एवं॥ ततुय्। यतुय्। कतुय्। इतुय्। हुतुय्। अतुय्। बोध्याः॥

॥ पञ्चम्यामपर ओर् ॥१३७॥

अकारः परो यस्मात्तथाविधः ओर् प्रत्ययः पञ्चम्यां भवति॥ तोर। ततः॥ योर। यतः॥ कोर। कुतः॥ होर वा ओर। अमुतः। इति॥

॥ तिहादिभ्यः काले ऽलिः ॥१३८॥

तिहादिभ्यः कालविषये अलिप्रत्ययो भवति॥ त्यलि। तदा॥ य्यलि। यदा॥ क्यलि। कदा॥ प्रत्ययस्य इदन्तत्वात्पक्षे पूर्वस्वरस्याप्रसिद्धता बोध्या॥ त्य॑लि। य्य॑लि। क्य॑लि। इति॥

॥ इहहुहोर्वुञ्व्वञादेशौ ॥१३९॥

अनयोः शब्दयोः सविभक्तिकयोः वुञ् व्वञ् आदेशौ क्रमेण भवतः॥ वुञ्। एतर्हि॥ व्वञ्। अधुना॥

॥ क्याहः कर् ॥१४०॥

क्याह्शब्दस्य कालविषये कर् आदेशो भवति॥ कर्। कदा॥

॥ उलुन्ताभ्यां रातुद्वहुभ्यामिः ॥१४१॥

स्पष्टम् ॥ रात्लि । नक्तम् ॥ द्वह्लि । दिवा ॥

॥ रातः कितु च ॥१४२॥

स्पष्टम् ॥ रात्कितु । नक्तम् ॥

॥ अन्यतो ऽपि च ॥१४३॥

न्यहफ्लि । प्रभातम् ॥ सुलि । अचिरेण ॥ यंचूकालि । चिरेण ॥ कालि । कालेन ॥ कालिक्यथ् । परतरेद्युः ॥ ततिकालिक्यथ् । परतरतरेद्युः ॥ कमिविज़ि । कदा ॥ तमिविज़ि । तस्मिन्काले ॥ यमिविज़ि । यस्मिन्काले ॥ इत्यादयो विज्ञेयाः ॥

॥ कोजुमिम्युजुशब्दाभ्यां स् ॥१४४॥

आभ्यां शब्दाभ्यां काले गम्यमाने स् प्रत्ययो भवति ॥ कांजिस् । प्राह्णम् ॥ मिमिज़िस् । अपराह्णम् ॥

॥ शेषेभ्यो ऽप्यन् ॥१४५॥

शेषेभ्यो रात्रिदिनविभागेभ्यः अन्येभ्यो ऽपि अन् प्रत्ययो भवति ॥ मन्दिज़न् । मध्याह्नम् ॥ दुपहरन् । मध्याह्नम् ॥ कालचनन् । सायम् ॥ बतन्यंगन् वा बतदवन् । नक्तम् ॥ अड्ड्रातन् । अर्धरात्रे ॥ पतिमुपहरन् । रात्रिपश्चायामे ॥ एवमितरभाषाशब्देभ्यो ऽपि व्यवह्रियते ॥ सुब्हन् । प्रभातम् ॥ शामन् । सायम् । इति ॥

॥ अः प्रत्यर्थे लिङ्गात्पूर्वः प्रथ् च ॥१४६॥

प्रतिशब्दस्यार्थे गम्यमाने अप्रत्ययो भवति लिङ्गात्पूर्वः प्रथ्शब्दश्च प्रयोज्यः ॥ प्रथ्द्वह । प्रतिदिनम् ॥ प्रथ्रहर । प्रतिप्रहरम् ॥ प्रथ्वरिह्य । प्रतिवर्षम् । इत्यादि ॥

द्वितीयान्तेभ्यः शब्देभ्यो ऽपि दृश्यते ॥ प्रथ्अकिस् । प्रत्येकम् ॥ प्रथ्विज़ि । प्रतिकालम् ॥ प्रथ्महानिविस् । प्रतिपुरुषम् ॥ प्रथ्ज़नानि । प्रतिस्त्रियम् । इत्यादि बोध्यम् ॥

॥ द्वहः प्रथ्लोपो वा ॥१४७॥

द्वह्शब्दात्पूर्वस्य प्रथ्शब्दस्य लोपो भवति ॥ द्वह । प्रतिदिनम् ॥

॥ यप्रत्यये नित्यम् ॥१४८॥

तस्मादेव द्वह्शब्दात् यप्रत्यये परे नित्यं प्रथ्शब्दस्य लोपो भवति ॥ द्वह्य् । प्रतिदिनमेव ॥ प्रथ्द्वह्य् । इति तु न भवति ॥

॥ वीप्सायामाद्यात्पथन्वर्थे ॥१४९॥

अनुशब्दस्यार्थे गम्यमाने वीप्सायां द्विरुक्तशब्दस्य आद्यात् पथ् प्रत्ययो भवति ॥ द्वहपथ् द्वह । अनुदिनम् ॥ वरिह्यपथ् वरिह्य । अनुवर्षम् ॥ ज़निपथ् ज़नि । अनुजनम् ॥ इत्यादि ॥

॥ इह्ब्रौँठ्शब्दाभ्यां वर्षार्थे उस् ॥१५०॥

स्पष्टम् ॥ इहुस् । ऐषमः ॥ ब्रौँठुस् [। आगामिवर्षे] ॥

॥ पथो रकारश्च ॥१५१॥

पथ्शब्दात् वर्षार्थे उस् प्रत्ययो भवति अन्त्यस्य रकारादेशश्च ॥ परुस् । परारि ॥

॥ पूर्वतरार्थे प्रार्यादेशः ॥१५२॥

पथ्शब्दात् पूर्वतरवर्षार्थे उस् प्रत्ययो भवति। पथ्शब्दस्य प्रा॑रि आदेशश्च ॥ प्रा॑युस् । पूर्वतरे वर्षे ॥

॥ पञ्चम्यन्ताद्दिगर्थे किनि ॥१५३॥

पञ्चमीप्रत्ययान्तेभ्यस्तदादिशब्देभ्यो दिगर्थे अभिधेये कि॒नि प्रत्ययो भवति [सू० १३२] ॥ ततिकि॒नि । ततः ॥ यतिकि॒नि । यतः ॥ कतिकि॒नि । कुतः ॥ इतिकि॒नि । इतः ॥ हुतिकि॒नि । अमुतः ॥ इत्यादि ॥ ब्रॅ॒ठिकि॒नि । अग्रतः ॥ प॑तिकि॒नि । पृष्ठतः ॥ दछि॒निकि॒नि । दक्षिणतः ॥ खोव्॒रिकि॒नि । वामतः ॥ त॑लिकि॒नि । अधरस्तात् ॥ प्य॑ठिकि॒नि । ऊर्ध्वतः ॥ इत्यादि ॥

एवमितरपञ्चम्यन्तेभ्यो यथा [सू० १३७] । तत्र प्रत्ययाद्येकारस्याकारः अन्त्यस्य तु पूर्णता दृश्यते ॥ तोरकनि । ततः ॥ योरकनि । यतः ॥ कोरकनि । कुतः ॥ ओरकनि वा होरकनि । अमुतः । इतः ॥

प्राणिकृतादेशेभ्यश्च यथा ॥ तमिकनि । तवकनि । ततः ॥ यमिकनि । यवकनि । यतः ॥ कमिकनि । कवकनि । कुतः ॥ इमिकनि । इवकनि । इतः ॥ हुमिकनि । आमिकनि । अवकनि । अतः ॥ एभ्य एव शब्देभ्यो ऽनन्तरवाचकः पतशब्दश्च प्रयोज्यः ॥ तमिपत । ततो ऽनन्तरम् ॥ तवपत । ततो ऽनन्तरम् ॥ इत्यादि बुद्धिमता स्वयं ज्ञेयम् ॥

॥ कालार्थे कालवाचिभ्यः ॥१५४॥

अज़्कनि [। अद्य प्रायः] ॥ पगाह्कनि [। श्वः प्रायः] ॥ का॑लिश्ययथ्कनि [। परश्वः प्रायः] ॥ ऊ॑त्रकनि [। परह्यः प्रायः]॥ द॑हुम्कनि [। दशम्यां प्रायः]॥ हारकनि [। आषाढ़मासे प्रायः] ॥ इत्यादि ॥

॥ अन्येभ्य इ् केवलश्च ॥१५५॥

तदादिशब्दव्यतिरिक्तेभ्यः अन्येभ्यः शब्देभ्यः केवल इ प्रत्ययश्च भवति दिगर्थे गम्यमाने ॥ ब्रूँठि । अग्रतः ॥ प॑ति । पृष्ठतः ॥ खोव्रि । वामतः ॥ दछि्नि । दक्षिणतः ॥ त॑लि । अधस्तात् ॥ प्यठि । ऊर्ध्वतः ॥ इत्यादि ॥

॥ सर्वेभ्यः पा॑रि च ॥१५६॥

सर्वेभ्यः प्राणिकृतादेशतदादिभ्यः अन्येभ्यो ऽपि शब्देभ्यो दिगर्थे अभिधेये पा॑रि प्रत्ययो भवति ॥ कमिपा॑रि वा कपा॑रि । कस्मात्पार्श्वतः ॥ तमिपा॑रि वा तपा॑रि [। तस्मात्पार्श्वतः] ॥ यमिपा॑रि वा यपा॑रि [। यस्मात्पार्श्वतः] ॥ इत्यादि ॥ हुमिपा॑रि वा हुपा॑रि [। अमुष्मात्पार्श्वतः] ॥ इमिपा॑रि वा इपा॑रि [। अस्मात्पार्श्वतः]॥ अमिपा॑रि वा अपा॑रि [। अमुष्मात्पार्श्वतः]॥ दछि्निपा॑रि [। दक्षिणपार्श्वतः]॥ खोव्रिपा॑रि । वामपार्श्वतः ॥ ब्रूँठिपा॑रि [। अग्रपार्श्वतः]॥ पति्मिपा॑रि [। पश्चात्पार्श्वतः] ॥ इत्यादि ज्ञेयम् ॥

॥ च़ोरो विश्वगर्थे च़्वच़्वादेशौ च ॥१५७॥

च़ोरशब्दात्पा॑रि प्रत्ययो भवति च़ोरश्च च़्व च़्ववा आदेशौ भवतः ॥ च़्वपा॑रि वा च़्ववापा॑रि । विश्वतः ॥ विश्वगर्थे किम् ॥ च़ोरिपा॑रि । चतुष्पार्श्वतः ॥

॥ सप्तम्यन्तात्कुन् ॥१५८॥

सप्तमीप्रत्ययान्तेभ्यः शब्देभ्यो दिगर्थे गम्यमाने कुन् प्रत्ययो भवति ॥ तोर्कुन् । तस्यां दिशि ॥ योर्कुन् । यस्यां दिशि ॥ कोर्कुन् । कस्यां दिशि ॥ योर्कुन् । अस्यां दिशि ॥ होर्कुन् वा ओर्कुन् । अमुष्यां दिशि [सू० १३६] ॥ एवं । तंतुकुन् । तस्यां दिशि ॥ यंतुकुन् । यस्यां दिशि ॥ कंतुकुन् । [कस्यां दिशि ॥] इतुकुन् । [अस्यां दिशि ॥] हुतुकुन वा अंतुकुन् । [अमुष्यां दिशि] [सू० १३६] । इति ॥ तूर्यकुन् । [तस्यामेव दिशि ॥] इत्यादयश्चोह्याः ॥ उकार-रहितात्प्रत्ययादपि व्यवह्रियते ॥ तथ्कुन् । यथ्कुन् । कथ्कुन् । इथ्कुन् । हुथ्-कुन् । अथ्कुन् । इति ॥ यप्रत्ययविशिष्टाच्च यथा ॥ तूर्य्कुन् । यूर्य्कुन् । तथ्य्-कुन् । यथ्य्कुन् । इत्यादयः स्वयं विचार्याः ॥ एवं । गाम्कुन् । गरकुन् । कलि-कुन् । वारिकुन् । [ह्यरुकुन ।] ह्युरुकुन् । ह्यूरुकुन् । ब्वन्कुन् । इत्यादि ॥ षष्ठ्य-न्तलिङ्गादपि प्रयुज्यते ॥ मोलिस् कुन् । पितुः पार्श्वे ॥ माज्य कुन् । मातुः पार्श्वे ॥ तमिस् कुन् । तस्य पार्श्वे ॥ यमिस् कुन् । [यस्य पार्श्वे ॥] इत्यादि ॥

॥ मयार्थे उवु ॥१५९॥

तन्मयः अस्तीत्यस्मिन्नर्थे उवु प्रत्ययो भवति ॥ स्वनुवु । स्वर्णमयः ॥ म्यच्चुवु । मृण्मयः ॥ काठुवु । काष्ठमयः ॥ इत्यादि ॥

॥ अधीनार्थे बुज़्य् ॥१६०॥

तस्याधीनमित्यस्मिन्नर्थे बुज़्य् प्रत्ययो भवति ॥ लूकबुज़्य् । लोकाधीनम् ॥ खुडबुज़्य् । गर्ताधीनम् ॥ कलयबुज़्य् । भार्याधीनम् ॥ इत्यादि ॥

॥ अडल्यंकुशब्दो विकलार्थे ॥१६१॥

विकले वस्तुनि अभिधेये सति अडल्यंकु शब्दो निपात्यते ॥ अडल्यंकु ।

विकलः ॥ अडलर्यंचू कोम्। विकला क्रिया ॥ अडलर्यंचू लंहू। विकला शाला ॥ इत्यादि ॥

॥ अभ्रधूमवातमात्रायां रिंग् ॥१६२॥

एषां त्रयाणां विकलत्वे मात्रायामभिहितायां सत्यां रिंग् प्रत्ययः स्यात् ॥ अंब्ररिंग्। अभ्रमात्रा ॥ दूहरिंग्। धूममात्रा ॥ वावरिंग्। वातमात्रा ॥ इति ॥

॥ प्राणप्रकाशयोर्ल्थ् ॥१६३॥

प्राणप्रकाशयोर्मात्रायामभिहितायां ल्थ् प्रत्ययो भवति। अत्र थकार आदेशकृतो ऽस्तीति ज्ञेयम् ॥ प्राणल्थ्। प्राणमात्रा ॥ शाहल्थ्। श्वासमात्रा ॥ गाशल्थ्। प्रकाशमात्रा ॥ चाँगिल्थ्। दीपमात्रा ॥

॥ पटस्य तूर् ॥१६४॥

पटस्य वस्त्रादेर्मात्रायां तूर् प्रत्ययो भवति ॥ कपट्तूर्। कार्पासखण्डः ॥ पंट्तूर्। और्णखण्डः ॥

॥ छल्तिलिमावन्यतश्च ॥१६५॥

वस्त्रादेरन्यस्यापि मात्रायामभिहितायां छल् प्रत्ययः तिलिम् प्रत्ययश्च स्यात् ॥ कपट्तिलिम्। कार्पासखण्डः ॥ च़्वच्यतिलिम्। अपूपखण्डः ॥ बुर्ज़तिलिम्। भूर्जखण्डः ॥ इत्यादि ॥ एवं। कपट्छल्। च़्वच्यछल्। बुर्ज़छल्। पच्यछल्। पट्टीखण्डः ॥ क्रूंहमाज़्छल्। यकृत्खण्डः ॥ इत्यादि ॥

॥ रेम्फ़् अल्पकरुणयोः ॥१६६॥

अल्पस्य करुणायाश्चार्थे रेम्फ़् भवति ॥ करुणायां यथा । ग़ुरिरेम्फ़् । पोतकः ॥ ग़ुरिरेम्फ़् । अश्वकः ॥ महनिविरेम्फ़् । पुरुषकः ॥ अल्पार्थे यथा । चूँठिरेम्फ़् । क्षुद्रपालीवतः ॥ इत्यादि ॥

॥ रैँछ़् संबन्धस्य ॥१६७॥

संबन्धस्याल्पत्वे अभिधेये रैँछ़् प्रयुज्यते । संबन्धस्तु वस्त्रादिकस्य वा भवतु जीवस्य वा भवत्विति ॥ कपर्रैँछ़् । कार्पासखण्डः ॥ मातामाल्रैँछ़् छ्यह् । मातामहगृहसंबन्धमात्रास्ति ॥

॥ ज़ंड्कांज़्तुलुश्च शाककाष्ठयोः ॥१६८॥

शाकानां काष्ठानां च सामान्येन मात्रायामभिहितायां सत्यां ज़ंड् प्रत्ययः कांज़् प्रत्ययो वा तुलु प्रत्ययो वा भवति । चशब्दात् थोपु प्रत्ययश्च स्यात् ॥ हाँकज़ंड् । किंचिच्छाकः ॥ काठज़ंड् । किंचित्काष्ठम् ॥ पोषज़ंड् । किंचित्पुष्पाणि ॥ हाककांज़् । काठकांज़् । पोषकांज़् ॥ हाकतुलु । काठतुलु । पोषतुलु । ज़िनितुलु । सिनितुलु । मुज्यतुलु ॥

॥ सस्यादीनां फलु ॥१६९॥

सस्यानां मात्रायां सामान्येन वाच्यायां सत्यां फलु प्रत्ययो भवति ॥ दाँफलु [सू० ३।८] । किंचिद्धान्यम् ॥ त्वमूलफलु । किंचित्तण्डुलः ॥ करफलु । किंचित्कलायः ॥ म्वंगफलु । किंचिन्मुद्गः । इत्यादि ॥ आदिशब्दादन्येभ्यो ऽपि ॥ चूज़फलु । किंचिदङ्गारः ॥ वठिफलु । किंचित्करीषः ॥ म्यच़्यफलु । किंचिन्मृत्तिका ॥ फलुशब्दस्य बहुत्वनिर्देशतस्तेषां कणा एव निर्णीयन्ते । न तु तेषां

साकल्यम्। यथा॥ दाँर्फ़लि। धान्यकणाः॥ त्वम्लफ़लि। तण्डुलकणाः॥ इत्यादि॥

॥ सर्वेभ्यो ऽसस्येभ्यो म्वया हना वा लक्ष्यतः॥१७०॥

अभ्रादिभ्यः सस्यवर्जितेभ्यः सर्वेभ्यः सामान्येन मात्रायां वाच्यायां म्वया हना वा भवति। लक्ष्यतो व्यवहारानुसारतः। अनयोराशब्दः सामान्यप्रत्ययजो ज्ञेयः॥ अंब्रम्वया। अंब्रहना॥ दूहम्वया। दूहहना॥ वावम्वया। वावहना॥ एवं सर्वेषाम्॥ हाकम्वया। हाकहना। इति पक्वस्यैव ज्ञेयः॥ हाकतुल्वा। इति पक्वापक्वयोरपि॥ एवं। पोषम्वया। पोषहना॥ काष्ठस्य तु न॥ एवं। च़्ऱम्वया। च़्ऱहना॥ म्यछ़्यम्वया। म्यछ़्यहना॥ असस्येभ्यः किम्। दाँम्वया। इति न भवति। किंतु। बतफ़ल्वा। बतम्वया। बतहना। इत्यस्मिन्सर्वे साधवः। शेषा व्यवहारतो ज्ञेयाः॥

॥ जलस्थानार्थ एव बल्॥१७१॥

बल् प्रत्ययः जलसंबन्धिस्थानस्यार्थ एव प्रयुज्यते॥ व्यथबल्। वितस्तास्थानम्॥ गंगबल्। गङ्गास्थानम्॥ मा़रबल्। मारी [नदी] स्थानम्॥ प्वखरिबल्। वापीस्थानम्॥ कू़रिबल्। कूपस्थानम्॥ आवरिज़बल्। चितास्थानम्॥ शिमूशानबल्। श्मशानस्थानम्॥

॥ अन्यत्रापि च बलिदानस्थाने॥१७२॥

यत्र जलदेवायान्यस्मै भूदेवाय भूतादिभ्यश्च बलिः प्रदीयते तत्रापि बल्शब्दः प्रयुज्यते॥ सबबल्। सभास्थानम्॥ वुरबल्। वरार्थं यत्र पाकः क्रियते॥ कोंद-

बल्। इष्टिकापाकस्थानम् ॥ राज़बल् । श्मशानस्थानम् ॥ ग्रटबल् । जलघरट्टस्थानम् ॥ इत्यादि ॥

॥ वार्शब्दस्य स्नानस्थाने वस्य यः ॥१७३॥

यत्रैव नरैः स्नानं क्रियते तत्रैव देवर्षिपितृभ्यो वारिदानं वितीर्यते इति कश्मीरसंप्रदायः । अतो नद्यादेर्यत्र कुत्रचित्स्थाने स्नानादि क्रियते तत्र वार्-शब्दात् बल् प्रत्ययो भवति वकारस्य च यत्वम् ॥ यारबल् । स्नानस्थानम् ॥

॥ पैँसयुगले टूँकु ॥१७४॥

टूँकुशब्दो निपात्यते ॥ टूँकु । पणयुगम् ॥

॥ तत्परतो हत् ॥१७५॥

त्र्यादिपणानां संख्यायामभिहितायां हत् प्रत्ययः स्यात् ॥ त्रिहथ् । पणत्रयम् ॥ च़ोर्हथ् । पणचतुष्कम् ॥ पाँच़्हथ् । पणपञ्चकम् ॥ परंतु यथा पूर्वोक्तसूत्रेषु शतसंख्यायां नवभ्यः शत् इति व्यवह्रियते [सू० ११९ इत्यादि] तथैवात्रापि विज्ञेयम् ॥ नव्शथ् । पणनवकम् । इत्यादि ॥ किंतु वणिग्जनैः पणदशकस्यापि सहस्रवाची सास्शब्दः परिभाष्यते ॥

॥ शतावधि जनसंख्यायां ज़ंनुशब्देनैव संख्यासमासः ॥१७६॥

जनसंख्यायां वाच्यायां सत्यां ज़ंनुशब्दादेव पूर्वमुत्तरं वा संख्याशब्दाः संगन्तव्याः ॥ ज़ंनि पंच़ाह्मर [सू० २।३।४४] । पञ्चाशज्जनाः ॥ शेट् ज़ंनि । षष्टिजनाः ॥ इत्यादि ॥

॥ लूक्शब्देन शतादिषु ॥१७७॥

जनानां शतसहस्रादिसंख्यायां वाच्यायां लूक्शब्देन संख्याशब्दाः पूर्वमुत्तरं वा संधेयाः॥ हथ् लूक। शतं जनाः॥ ज़्ह्हथ् लूक। जनानां द्विशती॥ त्रिहथ् लूक[। जनानां त्रिशती]॥ इत्यादि॥ हथ् ज़नि। शतं जनाः॥ सास् ज़नि। [सहस्रं जनाः॥] इति च कदाचिद्व्यवह्रियते तदल्पत्वाद्गौणमेव बोध्यम्॥

॥ त चार्थे ॥१७८॥

चशब्दस्यार्थे त भवति॥ सुह् त च़्ह्। स च त्वम्॥

॥ अपिशब्दार्थे ति ॥१७९॥

स्पष्टम्। बहुवचनेषु तशब्दस्थाने तिशब्द एव प्रयुज्यते॥ सुह् ति च़्ह् ति। सो ऽपि त्वमपि॥ महनिवि ति गुपन् ति आय्। नराश्च पशवश्चागताः॥ न तु महनिवि त गुपन् त आय्। इति भवति॥

॥ बिय पुनरपरार्थे ॥१८०॥

पुनः शब्दस्यार्थे बियशब्दः स्यात् अपरार्थे च॥ बिय कॅरिज़्। पुनः कुर्याः॥ बिय वति। अपरमार्गेण॥

॥ इवार्थे ज़न् ॥१८१॥

इवशब्दस्यार्थेऽत्र ज़न्शब्दो भवति॥ तोत ज़न् छुह परान्। शुक इवाधीते॥ मॉलिस् ज़न् छुह् रछान्। पितेव रक्ष्यते॥

॥ सादृश्यार्थे ह्युहु ॥१८२॥

स्पष्टम् ॥ मॉलिस् ह्युहु [वा हिहु]। पितृसंनिभः ॥ समासे तु । मोलु ह्युहु छुस्। सः पितृसंनिभस्तस्यास्ति ॥ स्वन् ह्युहु छुह् नॉपान्। स्वर्ण इव दीप्यते । इत्यादि ॥

॥ निर्धारणे च ॥१८३॥

स्पष्टम् । बुडु ह्युहु अंनिज़्यन् । वृद्धमिव समानयेः ॥ नात्र कोऽपि वृद्धसदृशो नरोऽवगम्यते । किंतु । य एव वृद्धो भवेत्तमेवानयेरित्यवधार्यम् ॥

॥ अन्यप्राधान्ये सहार्थे सूंत्य् ॥१८४॥

इतरस्य प्राधान्ये सति तेनैव साकं सहार्थे अभिधेये सूंत्य् प्रत्ययो भवति । वा सूंतिन् शब्दो भवति [सू० ३।१।६०] । सहार्थतृतीयायां विकल्पकथनात् ॥ मॉलिस् सूंत्य् आव् । पित्रा सहागतः॥ अत्र पितैव प्रधानः पुत्रस्तु तत्साहित्येनैवागमनकारी ॥

॥ स्वप्राधान्ये सान् ॥१८५॥

आत्मनः क्रियाप्राधान्ये सतीतरस्य सहार्थे अभिधेये सान् प्रत्ययः ॥ मॉलिस् सान् आव् । सतात आयातः ॥ अत्र पुत्र एव प्रधान्येनागमकृत् तातस्तु गौणतया तत्साहित्येनोद्दिष्ट इत्यादि स्वयमूह्यम् ॥

॥ द्वयादिभ्यः पञ्चभ्यो युगपदर्थे शवय् ॥१८६॥

द्विवाचकात् ज़ह्शब्दादारभ्य पञ्चभ्यः संख्याशब्देभ्यो युगपदर्थे शवय् प्रत्ययो भवति । पॉंच्शब्दाच्छकारलोपः ॥ द्वशवय् । द्वावेव ॥ त्र्यशवय् । त्रय एव ॥ च्वशवय् । चत्वार एव ॥ पॉंत्सवय् । पञ्चैव ॥ षशवय् । षडेव ॥

॥ नवय् वापाँच्भ्यः ॥१८७॥

एभ्यो ऽपाँच्भ्यः पाँच्शब्दवर्जितेभ्यो युगपदर्थे विकल्पेन नवय् वा प्रत्ययो भवति ॥ द्वनवय्। द्वावेव ॥ त्र्यनवय्। त्रय एव ॥ च़्वनवय्। चत्वार एव ॥ षनवय्। षडेव ॥ अपाँच्भ्यः किम्। पाँच़्नवय्। पञ्चैव ॥

॥ सप्तादिभ्यो वय् ॥१८८॥

सप्तादिसंख्यायाः साकल्येनार्थे गम्यमाने वय् प्रत्ययो भवति ॥ सतवय्। सप्तैव ॥ ऐठवय्। अष्टावेव ॥ नववय्। नवैव ॥ इत्यादि ॥ अत्रेदं ध्येयम्। वय्प्रत्ययान्तेभ्यो द्वितीयायां षष्ठ्यां च नी प्रत्ययो यलोपश्च स्यात्। कर्तृतृतीयायां तु इ प्रत्ययः। वय्शब्दात्पूर्वं च विकल्पेन वकारागम इति च ॥

॥ आद्यखण्डवीप्सापूर्वाः प्रथमे वा ॥१८९॥

प्रथमे द्वशवय् इत्याद्या आद्यखण्डस्य द्वश् त्र्यश् इत्यादिकस्य वीप्सापूर्वा युगपदर्थे वा कथ्यन्ते ॥ द्वंशि द्वशवय्। द्वावेव ॥ त्र्यंशि त्र्यशवय्। त्रय एव ॥ च़्वंशि च़्वशवय्। चत्वार एव ॥ पूँच़्ि पाँच़्वय्। इत्यादि ॥

॥ चोरश्च्वादेशो दशभ्यश्च ॥१९०॥

च़ोर्शब्दस्यात्रापि दशसंख्यापरतश्च च़्व आदेशो भवति ॥ च़्वशवय्। चत्वार एव ॥ च़्वदाह्। चतुर्दश ॥ च़्ववुह्। चतुर्विंशतिः ॥ इत्यादि ॥

॥ कुनु एककार्थे ॥१९१॥

केवलस्यार्थे कुनुशब्दो निपात्यते। कुनु। एककः ॥

॥ ह्ंरुजोरौ युगलार्थे ॥१९२॥

तत्र ह्ंरुशब्दः प्रायशो प्राणिव्यतिरिक्तवस्तुन्येव प्रयुज्यते ॥ यथा । ड्यज्य-ह्ंरु । ताटङ्कयुगलम् ॥ दूरह्ंरु । कर्णिकायुगम् ॥ वा॑लिह्ंरु । कुण्डलयुगम् ॥ पुलह्ंरु । तृणपादुकायुगम् ॥ खावह्ंरु । काष्ठपादुकायुगम् ॥ इत्यादि ॥ ग्राम्य-जनैस्तु । दाँदहूरि । वृषयुगम् ॥ इति शब्दोऽपि भाष्यते । जोर्शब्दस्तु प्रायः प्राणिविषये प्रयुज्यते क्वचिदप्राणिविषये च । यथा हूरिशब्दस्तथा जूरिशब्द-श्चावधार्यः ॥ म्वक्तजूरि । मुक्तायुगम् ॥ दाँदजूरि । वृषयुगम् ॥ कोतर्जूरि । कपोतयुगम् ॥ गुरिजूरि । अश्वयुगम् ॥ अख्जोर । एकं युगम् ॥ ज़्हजोर । युगद्वयम् ॥ त्र्यह्जोर । युगत्रयम् ॥ इत्यादि ॥ अख्ह्ंरु । एकं युगम् ॥ ज़्ह-ह्ंरि । युगद्वयम् ॥ त्र्यह्ह्ंरि । युगत्रयम् ॥ इत्यादि सर्वं बुद्धिमता स्वयमूह्यम् ॥ त्र्यादिदशावधिसंख्यानामेकत्वेन त्रिच च़ाक् पं॑ज़ु पक स॑तु ऐ॑ठि न॑मु द॑हु शब्दाः क्रमेण निपातनादेव विचारणीयाः ॥ त्रिच । त्रयम् ॥ च़ाख् । चतुष्कम् ॥ पं॑ज़ु । पञ्चकम् ॥ पक । षट्कम् ॥ स॑तु । सप्तकम् ॥ ऐ॑ठि । अष्टकम् ॥ न॑मु । नवकम् ॥ द॑हु । दशकम् ॥ इत्यादि ॥

॥ किंचिदर्थे पहान् ॥१९३॥

विशेष्यस्य वस्तुनः किंचिद्विशेषणार्थे वाच्ये पहान् शब्दः अग्रे प्रयोज्यः ॥ ब॑ड्ड पहान् । किंचिन्महान् ॥ व्यं॑ठु पहान् । किंचित्स्थूलः ॥ वुषुण् पहान् । किंचिदुष्णः । इत्यादि ॥ दिग्देशकालवाचिभ्यश्च शब्देभ्यो ऽग्रे प्रयोज्यः ॥ दूर् पहान् । किंचिद्दूरम् ॥ न्यूर् पहान् । किंचित्समीपम् ॥ ब्रौंठ् पहान् । किंचि-त्पूर्वम् ॥ पथ् पहान् । किंचित्पश्चात् ॥ च़ीरि पहान् । किंचिच्चिरेण ॥ का॑शुरु पहान् । किंचित्कश्मीरदेशजः ॥ बंगालुकु पहान् । किंचिद्बंगालदेशजः ॥ उहुर्युंदु पहान् । यहुर्युंदु पहान् । इत्यादि विज्ञेयम् ॥

इति श्रीशारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते तद्धितप्रक्रिया समाप्ता ॥४॥

अथ अव्ययप्रक्रिया ॥५॥

॥ क्रियासंबन्धिनो ऽव्यया नित्यम् ॥१॥

ये अव्ययशब्दास्ते नित्यं क्रियासंबन्धिनो भवन्ति ॥ यद्बै करख्। यदि कुर्याः ॥

॥ धातुभ्य आनव्यये ॥२॥

क्रियासंबन्धिनि अन्यधात्वर्थे अभिधेये सति तस्माद्धातोः आन् प्रत्ययो भवति स चाव्ययः ॥ व्यठान् आव्। स्थूलमागतः ॥ स्थूलं यथा स्यात्तथा आगत इत्यर्थः ॥

॥ वीप्सया वा ॥३॥

स्पष्टम् ॥ व्यठान् व्यठान् गौव्। स्थूलं स्थूलं गतः ॥

॥ स्वरान्ताद्वान् ॥४॥

स्वरान्ताद्धातोरव्यये वान् प्रत्यय इष्यते ॥ ख्यवान् ख्यवान्। खादन् खादन् ॥

॥ लिङ्गाभीक्ष्ण्येन च ॥५॥

यस्यैव विशेषणरूपस्य लिङ्गस्य क्रियासंबन्धः स्यात्तस्य शब्दस्य आभी-क्ष्ण्येन द्विरुक्तेन क्रियासंबन्धी अव्ययः स्यात् चशब्दात्केवलेनापि ॥ च़ंतुर् च़ंतुर् । शीघ्रं शीघ्रम् ॥ ल्वंतु ल्वंतु । मन्दं मन्दम् ॥ पक्षे । लवति लवति ॥ ग्वंब्रु ग्वंब्रु छुह् पकान् । गुरु गुरु चलति ॥ केवलेनापि यथा ॥ च़ंतुर् ख्यवान् छुह् । चतुरमत्ति ॥ ल्वंतु करान् छुह् । लघु करोति ॥ ग्वंब्रु पकान् छुह् । गुरु गच्छति ॥

इति श्रीशारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते
अव्ययप्रक्रिया समाप्ता ॥

अथ स्त्रीप्रत्ययप्रकरणम् ॥६॥

॥ स्त्रियाम् ॥१॥

अत्राधिकारे ये वक्ष्यमाणाः प्रत्ययास्ते स्त्रियामेवेत्यधिक्रियते ॥

॥ मनुष्यजातेः सर्वत्र बाय् ॥२॥

जातिर्द्विविधा एका साम्प्रदायिका अन्या शिल्पवशात्स्वर्णकाराद्या जातिर्लोके प्रोच्यते। न चात्र पशुपक्ष्यादीनां जातिर्गृह्यते मनुष्यशब्दस्य सूत्रे नियमात्। तयोर्द्वयोरेव जात्योः स्त्रीशब्दे अभिधेये सति बाय् प्रत्ययो भवति ॥ दरबाय्। कौलबाय्। इत्यादि ॥ बटबाय्। आर्य स्त्री ॥ स्वन्र्बाय्। स्वर्णकारस्त्री ॥ खारबाय्। लोहकारस्त्री। इत्यादि ॥ मनुष्यजातेः किम् ॥ कोतर्बाय्। कोतर्नाम्नी जातिस्तत्संबन्धिनी स्त्री। न तु कपोतस्त्री तत्र। कोतॢ इति भवति ॥

॥ अनादरार्थे कलय् ॥३॥

मनुष्यजातिवाचकाच्छब्दादनादरेण स्त्रीशब्दे अभिधेये कलय् प्रत्ययो भवति ॥ बटकलय्। ब्राह्मणस्त्री ॥ छानकलय्। तक्षकस्त्री ॥ अत्र यद्यपि कलय्-शब्दो भार्यार्थवाची वर्तते परंतु समासेनानादरार्थोऽवगम्यते ॥

॥ सर्वेषामुकारान्तानामूकारादेशः ॥४॥

सर्वेषां विशेष्यशब्दानां विशेषणशब्दानां चोकारान्तानां स्त्रीलिङ्गविषये ऊ-मात्रादेशो भवति ॥ पंटु । पंटू । पट्टिका ॥ म्वंटु । म्वंटू । स्थूला ॥ गंरु । गंरू । कठिना ॥ गुंरु । गुंरू । अश्वा ॥ द्वंबु । द्वंबू । रजकी ॥ वोवुरु । वोव्रू [सू० ८] । तन्तुवाया ॥ गगुरु । गग्रू [सू० ८] । मूषका ॥ पक्षे मनुष्यजातेः । द्वंबिवाय् । वोव्रिवाय् ॥

॥ वा छ्वंटुशब्दात् ॥५॥

स्पष्टम् ॥ छ्वंटु । छ्वंटू । ह्रस्वा ॥ पक्षे । छ्वटिञ् । इति मनुष्यजातेरेव ॥

॥ खरश्च ॥६॥

खर्शब्दात्स्त्रीलिङ्गविषये विकल्पेन ऊमात्रागमो भवति ॥ खंरू । खरी ॥ पक्षे । खरिञ् ॥

॥ लान्तानां जः ॥७॥

उकारविशिष्टानां लकारान्तानां लकारस्य जकारादेशो भवति ॥ वोलु । वांजू । [ऊर्मिका] कुण्डलिका ॥ डुलो ऽन्त्यात् लि आगम इष्यते ॥ डुलु । डुलिजि । कुण्डलिका ॥

॥ त्र्यक्षरादीनामुलोप उलोश्च ॥८॥

त्र्यक्षरादिकानां शब्दानां उलु प्रत्ययसंबन्धिन उपधाया उकारस्य लोपो भवति ॥ गाटुलु । गाट्जू । दक्षा ॥ फुटुलु । फुट्जू । पोटलिका ॥ चकुलु । चक्जू । चक्रिका ॥ पतुलु । पत्जू । उडुपिका ॥ ग्वगुलु । ग्वग्जू [। रक्तालुः] ॥ च्वतुलु । च्वत्जू । व्यभिचारिणी ॥ वातुलु । वात्जू । चण्डाली ॥ टटुल ।

टद्जू । काष्ठपात्रिका ॥ त्र्यक्षरादिकानां किम् ॥ गुरू । अश्वा ॥ गूरु । गूरू । [गोपालिका ॥] खरु । [खलतिः ॥] खरू [। रोग विशेषः] ॥ उलोः किम् । चूोलु । चूांजू ॥ मोलु । मांजू ॥ गूलु । गूजू ॥

॥ कवर्गान्तानां चवर्गः ॥९॥

उकारविशिष्टानां केवलानां च कवर्गान्तानां पुंलिङ्गानां स्त्रीलिङ्गविषये चवर्गादेशो भवति ॥ बतुकु । बत्चू । वर्तिका ॥ ह्वखु । ह्वछू । शुष्का ॥ ह्यूँगु । ह्यीँजू ॥ सूत्रादिगुटिका ॥

॥ न खूंखुच्चकोः ॥१०॥

स्पष्टम् ॥ खूँखु । खूँखू [। अवटीटा] ॥ च़्वंकु । च़्वंकू । अम्ला ॥

॥ तवर्गान्तानामप्रसिद्धः ॥११॥

स्पष्टम् ॥ मंतु । मंचू । उन्मत्ता ॥ कंथु । कंछू । भारिका ॥ व्वरुदु । व्वरूजू । पुनर्भूः ॥ वन् । वंञ् । वन्या ॥ गान् । गांञ् । वेश्या ॥ छान् । छांञ् ॥ तक्षकी ॥ हूनु । हूञ् । शुनी ॥ एवं सर्वत्र ॥

॥ कंगो ऽल्पार्थे राकारश्च ॥१२॥

कंग् बृहदङ्गारधानिका । तस्मादल्पार्थे र् प्रत्ययो भवति आकारश्च भवति ॥ काँग्र् । हसन्तिका ॥

॥ चा़सः कृत्रिमे सस्य च खः ॥१३॥

चा़स् सहजकासस्तस्मात्कृत्रिमे ऽर्थे र् प्रत्ययः सकारस्य च खकारो भवति ॥ चा़ख्र् । कृत्रिमकासः ॥

॥ त्रकस्तुलायाम् ॥१४॥

तुलाया अर्थे त्रक्शब्दात् र् प्रत्ययो भवति ॥ त्रख् । द्रोणः ॥ त्रकूर् । तुला ॥

॥ म्वंडुशब्दस्यान्त्यस्वरलोपः ॥१५॥

म्वंडु बृहत्काष्ठम् । तस्मादल्पस्यार्थे र् प्रत्ययो भवति । अन्त्यस्वरस्य च लोपो भवति ॥ म्वंडु । म्वंड्र् । अल्पकाष्ठम् ॥

॥ फ्वंतुशब्दस्य च ॥१६॥

र्प्रत्ययान्त्यस्वरलोपौ भवतः ॥ फ्वंतु । फ्वत्र् । कटोलिका ॥

॥ लटोश्च ॥१७॥

लंटु पुच्छस्तस्मादल्पस्यार्थे र्प्रत्ययान्त्यस्वरलोपौ भवतः ॥ लंटु । लट्र् । पुच्छिका ॥ तत्सादृश्ये ऽपि व्यवह्रियते । कूटि लट्र् । क्षुद्रकाष्ठम् ॥

॥ मक्शब्दाच्च्प्रत्ययः ॥१८॥

मख् परशुस्तस्मादल्पार्थे च्च प्रत्ययो भवति ॥ मकूच् । परश्वधिका ॥

अल्पार्थे कृत्रिमार्थे च स्त्रीलिङ्गोद्देशके ऽपि च ।
सादृश्ये स्वविशेषे ऽर्थे स्त्रीलिङ्गप्रत्ययाः खलु ॥

अल्पार्थे यथा । कतुरु । कपालः ॥ कत्रू । कपालिका ॥ कृत्रिमार्थे यथा । च्चाख्र् । कृत्रिमकासः ॥ वस्तुनः सजीवस्य निर्जीवस्य वा स्त्रीलिङ्गेनोद्देशे कर्तव्ये सति स्त्रीप्रत्ययो भवति ॥ म्वंगुरु । छागपोतः ॥ म्वंगूरू । छागपोता ॥ वंछु । वत्सः ॥ वछ्र् । वत्सा ॥ न चात्र वत्सस्य स्त्री वत्सा इत्यवगम्यते किंतु वंछु-

शब्दस्य पुंलिङ्गस्य स्त्रीलिङ्गेन निर्देशः ॥ सादृश्ये यथा ॥ कथु । कछू ॥ ततुरु । पीडा ॥ ततरू । कोपपीडा ॥ स्वविशेषे ऽर्थे यथा ॥ नंरु । वस्त्रभुजः ॥ नंरू । भुजः ॥ अत्र नंरूशब्दस्य स्वयं स्त्रीलिङ्गत्वान्नाल्पत्वाद्यर्थग्रहः किंतु वस्त्रभुजस्याधारार्थे ऽत्र स्त्रीलिङ्गोद्देशः । यद्वा परस्परं विनिमयोपशमाद्यत्राद्यः शब्दः पुंलिङ्गो भवति तत्र तत्संबन्धिनो ऽन्यशब्दस्य स्त्रीलिङ्गेनोद्देशः क्रियते । यत्र तु स्त्रीलिङ्गस्तत्र पुंलिङ्गोद्देशः ॥ नंरु । नंरू ॥ खंरु । खंरू । खलतिः ॥

॥ ह्स्तुशब्दान्नित्यमिञ् ॥१९॥

उकारान्तत्वात् ऊमात्रादेशनिवृत्त्यर्थं नित्यमिञ् प्रत्ययो भवति ॥ ह्स्तिञ् । ह्स्तिनी ॥

॥ काव्नाग्वूँट्भ्यश्च ॥२०॥

एभ्यः शब्देभ्यो नित्यमिञ् भवति ॥ काविञ् । काकी ॥ नागिञ् । नागा ॥ वूँटिञ् । उष्ट्रा ॥

॥ अन्यतो ऽपि पशुजातेः ॥२१॥

स्पष्टम् ॥ खरिञ् । खरी ॥

॥ ब्यंठुगूठ्भ्यां निन्दार्थे ॥२२॥

स्पष्टम् ॥ ब्यठिञ् । स्थूला ॥ गूठिञ् । स्थूला ॥ निन्दायां किम् । ब्यंठू । स्थूला ॥

॥ ब्वटशब्दात्स्त्रियाम् ॥२३॥

स्त्रीलिङ्गविषये इञ् भवति न निन्दार्थे ॥ ब्वटिञ् । [वुटिञ् ।] ब्वटजातिः स्त्री ॥ पक्षे । ब्वटघाय् ॥

॥ बुगियशब्दाद्यलोपश्च ॥२४॥

बुगिय् स्वामी तस्मादिञ् प्रत्ययो भवति । यकारस्य च लोपो भवति ॥ बुगिञ् । स्वामिनी ॥

॥ ज़लात्पादनिदाघे ॥२५॥

ज़लशब्दात्पादस्वेदार्थे इञ् भवति ॥ ज़लिञ् । पादस्वेदः ॥

॥ गराद्गृहसंस्कारे ॥२६॥

गृहसंस्कारेऽभिधेये गरशब्दात्स्त्रियामिञ् भवति ॥ गरिञ् । गृहसंस्कारिणी ॥ अन्यत्र । गर्वाज़्यञ् । गृहिणी ॥

॥ द्बुशब्दादायुधे ॥२७॥

स्पष्टम् ॥ द्बुविञ् । मृगरूपो रजकायुधः ॥ अन्यत्र । द्बु घा द्बुविघाय् । रजकस्त्री ॥

॥ मनुष्यजातेरञ् ॥२८॥

मनुष्यजातिवाचकाच्छब्दादञ् प्रत्ययो भवति ॥ बटञ् । ब्राह्मणी ॥ मुसलमानञ् । म्लेच्छानी ॥ हाकग्राकञ् । शाकविक्रेत्री ॥ वाङ्यञ् । वणिक्स्त्री ॥

॥ वोलुप्रत्ययान्तान्नित्यम् ॥२९॥

स्पष्टम् ॥ गर्वाज्यस्र् । गेहिनी ॥ न तु गद्वोलुशब्दस्य उकारान्तत्वात् ऊमात्रादेशः स्यान्नित्यग्रहणात् ॥ प्रत्ययान्तात्किम् । वोलु । वोनू ॥

॥ प्रत्ययादेर्यो रान्तेभ्यः ॥३०॥

रकारान्तेभ्यः शब्देभ्यः प्रत्ययादिवर्णस्य यकारो भवति ॥ सार्ल्यस्र् । अतिथिस्त्री ॥ प्वहर्यस्र् । गृहागता ॥ रंग्र्यस्र् । रजकस्त्री ॥ स्वन्र्यस्र् । स्वर्ण-कारस्त्री ॥ दाँद्र्यस्र् । शाकविक्रेत्री ॥ काँद्र्यस्र् । आपूपिकी ॥ स्वश्र्यस्र् । पुत्र-श्वश्रूः ॥ महार्यस्र् । महाराजस्त्री । वधूः ॥ राज्यर्यस्र् । देवी । राजस्त्री ॥

॥ पण्डितगुजरयोरा ॥३१॥

आभ्यां शब्दाभ्यां प्रत्ययादिवर्णस्य अप्रसिद्ध आकारो भवति ॥ पंडिता-स्र् । पण्डितस्त्री ॥ गुजरांस्र् । जाबालस्त्री ॥

इति श्रीशारदाक्षेत्रभाषाव्याकरणे कश्मीरशब्दामृते

स्त्रीप्रत्ययप्रक्रिया समाप्ता ॥६॥